Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

टीका शिवपरा अथ महिम्नस्तोत्रटीकाप्रारंभः टीका विष्णुपरा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशायनमः विश्वेश्वरंगुरुंनत्वामहिम्नाख्यस्तुतेरयम् पूर्वाचार्यकृतव्याख्यासंग्रहःक्रियतेमया
१ एवंकिलोपाख्यायतेकश्चित्किलगंधर्वराजः कस्यचिद्राज्ञः प्रतिदिनंप्रमदाकेलिवनकुसुमानिह
रन्नासीत् तज्ज्ञात्वाचशिवनिर्माल्यलंघनेनमत्पुष्पचोरस्यांतर्द्धानादिकासर्वापिशक्तिर्विनंक्ष्यतीत्य
भिप्रायेणराज्ञाशिवनिर्माल्यंपथिनिक्षिप्तंतदप्रतिसंधायचगंधर्वराजस्तत्रप्रविशन्नेवकुंठकुश-

महिम्नःपारंतेपरमविदुषोयद्यसदृशीस्तुतिर्ब्रह्मादीनामपितदवसन्नास्त्वयिगिरः

क्तिर्बभूव ततश्चशिवनिर्माल्यलंघनेनैवममेतादृशंवैकुंव्यमतिप्रणिधानेनविदित्वापरमकारुणि
कंभगवंतंसर्वकामदंतमेवतुष्टाव ननुस्तुतिर्नामगुणकथनंतच्चगुण ज्ञानाधीनंअज्ञातस्यकथ
नासंभवात् तथाचभगवतोगुणानामनंतत्वेनज्ञातुमशक्यत्वात्कथंतत्कथनरूपास्तुतिरनुरूपाभ
वेत् अननुरूपाकरणंचोपहासायैवेतियाशंका तदपनोदव्याजेनस्वस्यानौद्धत्यंदर्शयन्नेव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भगवंतंस्तोतुमारभते हेहरसर्वाणिदुःखानि हरतीतिहरः योग्यंसंबोधनम् सर्वदुःखहरत्वेनैवप्रसि-
द्धोसि नममदुःखहरणेपृथग्व्यापारंकरिष्यसीत्यभिप्रायः हेसर्वदुःखहरतेतवमहिम्नःपरंपारंअवधिं
अविदुषः एतावानेवमहिमेतीयत्तयाऽजानतः कर्तृत्वसंबंधेषष्ठी अज्ञान कर्तृकास्तुतिर्यदिअसदृ
शीअननुरूपाअयोग्येतियावत् तत्तर्हिब्रह्मादीनांसर्वज्ञानामपिगुणकथनरूपागिरस्त्वयिविषयेअव

अथावाच्यःसर्वःस्वमतिपरिणामावधिगृणन्ममाप्येषस्तोत्रेहरनिरपवादःपरिकरः १

सन्नाअयोग्याएवेत्यर्थः तैरपीयत्तयाज्ञानात् इयत्तायाअसत्त्वेनतदज्ञानेसार्वज्ञ्यव्याघातोपिनसन्मा
त्रविषयत्वात्सार्वज्ञस्य अन्यथाभ्रांतत्वप्रसंगात् तथाचश्रीभागवते विष्णोर्नुवीर्यगणनांकतमोर्हतीहयः
पार्थिवान्यपिकविर्विममेरजांसीति अथेतिपक्षांतरे स्वमतिपरिणामावधि स्वस्यमतिपरिणामोबुद्धि
विषयतासएवावधिर्यत्रेतिक्रियाविशेषणम् स्वबुद्ध्यायावद्विषयीकृतंतावद्गृणन्वाक्सृष्टिसाफल्या १

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्कथयन्सर्वोपिस्तोताऽवाच्यःअनुपालंभनीयः सावाग्ययातस्यगुणान्गृणीतेजिव्होऽसतीदार्दुरिकेव सूत नचोपगायत्युरुगायगाथाइतिचश्रीभागवतवचनात् तर्हिनभःपतंत्यात्मसमंपतत्रिणइतिन्यायेन ममाप्येषःपरिकरःआरंभःस्तोत्रविषयेनिरपवादःअखंडनीयःस्वबुद्ध्यनुसारेणयोग्यइत्यर्थः प्रथमार्द्धेनस्तुतिनिराकरणव्याजेनसर्वदुरधिगममहिमत्वरूपामहतीस्तुतिःकृता उत्तरार्द्धेनस्तुतिसमाधानव्याजेनसर्वस्तुत्यत्वरूपेतिमहत्कौशलम् अन्यच्चगंधर्वराजस्यमहाकुशलत्वादेकेनैवश्लोकेनयथाश्रुतिवक्ररीत्याचहरिशंकरयोःस्तुतिस्तयोरभेदज्ञानायाभिप्रेता तत्रहरपक्षेयथाश्रुतिव्याख्यातं

हरिपक्षेपितदेवयोजनीयम् संबोधनपदंतुअहरेति हरतीतिहरः संहर्त्ता तद्विरुद्धोऽहरःपालयितेत्यर्थः अथवापिअहोपरम परामालक्ष्मीर्यस्येतितथाहेलक्ष्मीपते लक्ष्मीपतित्वान्ममापलक्ष्मीस्त्वतएवनाशयिष्यसीतियोग्यंसंबोधनम् यदितेमहिम्नःत्वन्महिमासंबंधिनीत्वन्महिमविषयास्तुतिःगिरोमहिम्न इतियोजनापेक्षयातेस्तुतिरित्येवसमीचीनम् तत्तर्हिअवसन्नाअल्पाअसदृशीअन

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नुरूपापिअस्त्त. नत्वन्यदेवतानांअनल्पा अनुरूपापि अत्र हेतुगर्भविशेषणंतवकीदृशस्य ब्रह्मादी
नांतावकानांगिरःस्तुतिरूपायाःपारंविदुषःस्तोतुःश्च मंस्तु नैर्गुणदोषौन्वजानन्त इत्यर्थः सर्वदेवस्त
त्यत्वेननिरतिशयसार्वज्ञेनचतवेवसर्वोत्कृष्टत्वादित्यभिप्रायःस्तुतिफलंदर्शयन्स्वस्यविनयाति
शयंदर्शयितुमाह अथस्वंत्वांअतिपरिणामावधि अतिक्रांतो बुद्धिपरिपाकावधिःसीमायत्रतादृशं
यथास्यात्तथास्वशक्तिमतिक्रम्यापिगृणन्स्तुवन्सर्वोपिजनः आवाच्यः आभिमुख्येन वाच्यःसं
भाषणीयस्त्वयेत्यर्थः यस्मादेवंसर्वथैवानुगृह्यते त्वयास्तोताअतएवममापिस्तोत्रेस्तुतिकर्त्रे
एषःपरिकरोनमस्कारादिप्रबंधः कीदृशःअनिरपवादः नविद्यतेअतिशयेनापवादोदूषणंयस्मात्स
तथा अहरिति वीप्सनीयं अहरहःसर्वदेत्यर्थः यद्विषयकस्तुतिकर्तृत्वेनान्योपिसर्वदानमस्यःकिं
मुवक्तव्यंसससर्वदासर्वेषांनमस्यतरोभवति इतिभगवतिरत्यतिशयोव्यज्यते एवंयस्यायोग्यापिस्तु
तिःसान्निध्यफलातस्ययोग्यास्तुतिःकिन्नफलिष्यतीतिध्वनितं हरिपक्षेप्येवंतत्रपरमश्चेष्ठेतिसंबोधनं
१



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनरप्यस्तुत्यत्वेनैव भगवंतंस्तौतिअतीतिपूर्वोक्तं स्वस्य ब्रह्मादिसाम्यमुपपादयन् पूर्वोक्तंसंबोधनमा वर्तनीयम् तवमहिमासगुणोनिर्गुणश्चवाङ्मनसयोः पंथानंविषयत्वंअतीतःअतिक्रांतः चशब्दोऽव धारणे अतीतएवेत्यर्थः अनंतत्वान्निर्धर्मकत्वाच्च तथाचश्रुतिः यतोवाचोनिवर्त्तंतेअप्राप्यमनसासहे तिवागविषयत्वेतत्रश्रुतेः प्रामाण्यंनस्यादित्याशंक्याह यंश्रुतिरपिअपौरुषेयोपिवेदवाणीचकितंभी

अतीतःपंथानंतवचमहिमावाङ्मनसयोरतद्व्यावृत्त्यायंचकितमभिधत्तेश्रुतिरपि

तंयथास्यात्तथाअभिधत्तेतात्पर्येणप्रतिपादयति सगुणपक्षेकिंचिदप्यनुक्तंमाभूदिति निर्गुणपक्षेतु स्वप्रकाशस्यान्याधीनप्रकाशतामाभूदितिभयं केनप्रकारेणअतद्व्यावृत्त्या सगुणपक्षेनतद्व्यावृत्तिरत द्व्यावृत्तिस्तयाऽभेदेनेत्यर्थः सर्वंखल्विदंब्रह्मसर्वकर्मासर्वकर्म इत्यादिनासर्वाभेदेनैवभगवंतंप्रतिपा दयति नत्वेकैकशोमहिमानंवदतीत्यर्थः निर्गुणपक्षेतु नतत् अतत् अविद्यातत्कार्यात्मकमुपाधिद्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्थं इति यावत् अलक्ष्यार्थत्वात्तत्परित्यागेन जहल्लक्षणयेत्यर्थः मायाविद्योपहितचैतन्यं शक्यं तत्पदं तत्कार्य बुद्ध्याद्युपहितचैतन्यं शक्यं त्वं पदं उपाधिभागत्यागेन अनुपहितचैतन्यस्वरूपं स्वप्रकाशमपि तदाकार वृत्तिमात्रजननेनाविद्यातत्कार्यनिवृत्त्या बोधयतीति वेति न तावद्विषयत्वं मुख्यं तस्येत्यर्थः अतए व स तादृशः सगुणो निर्गुणश्च महिमा कस्य स्तोतव्यः कर्त्तरि षष्ठी न केनापि स्तोतुं शक्य इत्यर्थः सगु

स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः २

णस्य स्तोतव्यत्वाभावे हेतुमाह कतिविधगुणः कतिविधा अनेकप्रकारा गुणा यत्र स तथा अनंतत्वादे वन स्तुत्यर्ह इत्यर्थः निर्गुणस्य स्तोतव्यत्वाभावे हेतुमाह कस्य विषय इति न कस्यापि विषयः निर्धर्मि कत्वात् अतएवाविषयत्वान्न स्तुत्यर्ह इत्यर्थः सगुणो ज्ञेयत्वेपि अनंतत्वात् निर्गुणस्त्वेकरूपोपि ज्ञेय त्वाभावान्न स्तुत्यश्चेत्तर्हि स्वमतिपरिणामावधिगृणन्निति पूर्वोक्तं विरुद्ध्येतेत्यत आह पदे त्विति



For Private and Personal Use Only

अर्वाचीनेनवीनेभक्तानुग्रहार्थंलीलयागृहीतेवृषभपिनाकपार्वत्यादिविशिष्टेरूपेकस्यविदुषोमनोन
पततिनआविशतिकस्यवचोनाविशति अपितुसर्वस्यापिमनोवचश्चाविशतीत्यर्थः तत्राहिरण्यगर्भ
स्यास्मदादेश्चसममेवस्तुतिकर्तृत्वमितिनपूर्वापरविरोधः हरिपक्षेप्येवम् अथवायंअतद्यावृ
त्याकार्यप्रपंचभेदाच्चकितंभीतंमद्भिन्नत्वेनकार्यप्रपंचंमापश्यत्वितिशंकमानंश्रुतिरभिधत्तेइतिपूर्व
वत्अर्वाचीनेपदेतुकमलकंबुकौमोदकीरथांगकमलालयाकौस्तुभाद्युपलक्षितेनवजलधरश्याम
धामनिश्रीविग्रहेवैकुंठवर्तिनिवेणुवादनादिविविधविहारपरायणेगोपकिशोरेवावृंदावनवर्ति
निकस्यमनोनअपततिकस्यवचश्चनअपतति अपगताततिर्विस्तारोयस्मात्तत्अपततिसंकु-
चितमित्यर्थः तवश्रीविग्रहानुचिंतनेतद्गुणानुकथनेचविषयांतरपरित्यागेनविलीयमनोवस्थं
मनोवचश्चैकमात्रविषयतयासंकुचितंभवति तवश्रीविग्रहेएवासक्तंभवतिइतिभावः २ न-
न्वेवंस्तुत्यत्वेपिहरिहरयोः सर्वज्ञयोरनभिनयादास्तुत्यानमनोनुरंजनंतद्विनान तत्प्रसादस्तंवि

नानफलमितिपुनरपिस्कृतेवैयर्थ्येप्राप्तेसार्थक्यंदर्शयन्स्तौति मध्विति हेब्रह्मन्विभोस्मरगुरोर्ब्रह्म
णोपिवाक्वाणीतवकिंविस्मयपदंचमत्कारकारणंकिंकिंशब्दआक्षेपेनेत्यर्थः तत्रहेतुगर्भविशेष
णमाह तवकीदृशस्य वाचः वेदलक्षणाः निर्मितवतः निश्वासवदनायासेनाविर्भावितव
तः कीदृशीः मधुस्फीताःमाधुर्यादिशब्दगुणालंकारविशिष्टत्वेनमधुराः तथापरमममृतंनिरति

मधुस्फीतावाचःपरमममृतंनिर्मितवतस्तवब्रह्मन्किंवागपिस्मरगुरोर्विस्मयपदम्

शयामृतवदत्यास्वाद्याः एतेनार्थगतमाधुर्यमुक्तम् परमेश्वरवाचांशब्दार्थगतयोर्निरतिशयमाधु
र्ययोरपिमिथस्तारतम्यंमध्वमृतशब्दाभ्यांद्योत्यते अयंचवाचामुत्कर्षोमहान्यत्रशब्दगुणाल-
कारातिशयंविनाऽर्थगुणालंकारइति यत्राहिरण्यगर्भस्यवाण्यपिनचमत्कारकारणंतत्रकावार्त्ताऽ ४
स्मदादिवाण्याइत्यर्थः तर्हिकिंस्तुत्येत्यतआह ममत्वित्यादि हेपुरमथनत्रिपुरांतकभवतोगुण

कथनपुण्येनएतांस्वांवाणींपुनामिनिर्मलीकरोमीत्यभिप्रायेणएतस्मिन्नर्थेयमबुद्धिर्व्यवसिता न
तुस्तकृतिकौशलेनत्वांरंजयामीत्यभिप्रायेणेत्यर्थः वाङ्मैल्येनमन्नैर्मल्यंनांतरीयकमितिश्रुतेः सार्थक्य
मुक्तम् हरिपक्षेप्येवम् मथ्यतेऽस्मिन्दध्यादीतिमथनंगोकुलंअथवामथ्यतेयोऽमृतार्थमितिमथ
नः क्षीरोदः पुरंमंदिरंगोकुलंक्षीरोदोवायस्येतिपुरमथनसंबोधनार्थः सर्वमन्यत्समानम् अथवा

ममत्वेतांवाणींगुणकथनपुण्येनभवतः पुनामीत्यर्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता३

हेब्रह्मन्वाचः सर्वस्यापिपरममममृतंनिरतिशयसारंनिश्चयेनमितवतः सम्यगनुभूतवतः सुरगुरो-
र्हिरण्यगर्भादिसर्वदेवतोपाध्यायस्यतवमधुस्फीतामधुरिम्णाव्याप्ताअंतराकटुकलेशेनापिरहि-
तावागपिवाग्देवतासरस्वत्यपिविस्मयपदंनेत्यर्थः तस्यामद्वाचश्चमहदंतरमतिप्रसिद्धमेवय
द्यप्येवंतथापित्वदिच्छयेवममेयंप्रवृत्तिरित्याह ममत्वेतामिति निजगुणकथनपुण्येनममत्वे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तांममत्वेवर्त्तमानांसंसारसंसर्गकलुषितांवाचंएतस्यस्तुतिकर्त्तुरितिशेषः पुनामिनिष्कलुषांक
रोमीत्येतस्मिन्नर्थेहेपुरमथनभवतोबुद्धिर्व्यवसितायःतोःतोनायंनैवममप्रवृत्तिरित्यर्थः श्रुतिश्चभ
वति एषउह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतेएषउएवासाधुकारयतियमधोनी
नीषतइति स्मृतिश्च अज्ञोजंतुरनीशोयमात्मनःसुखदुःखयोः ईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्व

तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तंतिसृषुगुणभिन्नासुतनुषु

भ्रमेवचेति तेनपरमकारुणिकस्त्वंशरणागतवाणीपावनपुण्यहेतुस्तुतिनत्परंलोकंकर्त्तुंस्वयमे
वप्रयतमानोययाकयापिस्तुत्याप्रसीदसीत्यर्थः ३ एवंहरिहरयोःस्तुत्यत्वंसफलस्तुतिकर्त्तृत्वंचनि
रूप्ययेकेचित्पापीयांसस्तस्यभावेपिविवदंतेतान्निराकुर्वन्स्तौति तवेति हेवरदईप्सितप्रदयत्तवऐ
श्वर्यंतद्विहंतुंनिराकर्त्तुंएकेजडधियःकेचिन्मंदबुद्धयःव्याक्रोशींविदधते साक्षेपमुच्चैर्भाषणमाक्रो ५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शस्तस्यव्यतिहारोव्याक्रोशीअन्येनकर्तुमारब्धमन्यःकरोति अन्येनचान्यइति कर्मव्यतिहारः व्याङ्पूर्वात्
क्रोशेःकर्मव्यतिहारेणचस्त्रियामितिपाणिनिस्मरणात् ततःस्वार्थेअन्णचस्त्रियामञितिसूत्रात् ततस्त्रि
यांङीप् तांव्याक्रोशीमहमहमिकयाकुर्वते यत्सर्वप्रमाणप्रमितंतदपिजिघांसंतीतियत्तज्ज्ञांमंदबुद्धि
त्वंद्योतितंअतएवकर्त्रभिप्रायेक्रियाफलेविदधातेरात्मनेपदम् नहितद्व्याक्रोशीविधानात्तवैश्वर्यव्या

अभव्यानामस्मिन्वरदरमणीयामरमणींविहंतुंव्याक्रोशींविदधतइहैकेजडधियः४

घातःकिंतुतेषामेवाधःपातइत्यर्थः कीदृशंतवैश्वर्यंजगदुदयरक्षाप्रलयकृत् जगतआकाशादिप्र
पंचजातस्यउदयंसृष्टिंरक्षांस्थितिंप्रलयंसंहारंचकरोतीतितथा अनेनानुमानंमानमुक्तंतत्त्वाज
न्मानोलोकाइत्यत्रव्यक्तंवक्ष्यते तथात्रयीवस्तुत्रयाणांवेदानांतात्पर्येणप्रतिपाद्यंवस्तुसर्वेवेदा
यत्पदमामनंतीतिश्रुतेः अनेनागमःप्रमाणमुक्तम् तथागुणैःसत्वरजस्तमोभिःलीलोपात्तैर्भिन्ना

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तःपृथक्कृतास्तःनतुवस्तुगत्याभेदइत्यर्थः तिसृषुतनुषुब्रह्मविष्णुमहेश्वराख्यासुमूर्त्तिषुन्यस्तांविवि
च्यन्यस्तंप्रकटीकृतमितियावत् उपलक्षणंचैतत्सर्वेषामवताराणां एतेनप्रत्यक्षंप्रमाणमुक्तं तेनस
र्वप्रमाणप्रमितमित्यर्थः कीदृशींव्याक्रोशीं अस्मिन् अभव्यानां अस्मिन्त्रैलोक्येपिनास्तिभव्यंभद्रं
कल्याणंयेषांतेअभव्यास्तेषांरमणीयांमनोहरांवस्तुतस्तुअरमणींअमनोहरांअमनोहरेपिमनो
हरबुद्धिर्भ्रांतिरभाग्यातिशयात्तेषामित्यर्थः हरिपक्षेप्येवम् अथवाअस्मिन्नुतवैश्वर्ये अभव्यानां
मध्येजडधियःजडमतेरत्यंतमपकृष्टस्येत्यर्थः तस्यवस्तुतोऽरमणींव्याक्रोशींविहंतुंएकेमुख्या
रमणीयांव्याक्रोशींविदधतइत्यर्थः जडधियइत्येकवचनेनपूर्वपक्षिणस्तुच्छत्वम् एकइ
तिबहुवचनेनसिद्धांतिनामतिमहत्त्वंसूचितम् ४ येत्वात्मप्रत्यक्षमपन्हुवतेत्र्यर्थांश्चान्यथा
वर्णयंतियेतेऽनुमानेनैवनिराकार्याः तच्चानुमानंक्षित्यादिकंसकर्तृकंकार्यत्वात् घटवदिति
जगदुदयरक्षाप्रलयकृदित्यनेनसूचितंतत्रपूर्वश्लोकोक्तव्याक्रोशीबीजप्रतिकूलतर्कमुद्रा ६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वयतः पूर्वपक्षिणोनिराकुर्वन्स्तौति अथवाकीदृशींव्याक्रोशींविदधतइत्याकांक्षायांतावद
न्स्तौति किमिति हेवरदेतिपूर्वश्लोकासंबोधनानुषंगः त्वयिविषयेअयंकुतर्कः तर्काभासःकां
श्चित्हतधियः कानपिदुष्टबुद्धीनूजगतोविश्वस्यापिमोहायअन्यथाप्रतिपत्तयेमुखरयतिवाचालां
न्करोतिकीदृशेत्वयिअतर्क्यतर्कागोचरमैश्वर्ययस्यतस्मिन्सर्वतर्कागोचरेत्वयियःकश्चित्तर्कःस्वातंत्र्ये

किमीहःकिंकायःसखलुकिमुपायस्त्रिभुवनंकिमाधारोधातासृजतिकिमुपादानइतिच

णोपन्यस्यतेससर्वोप्याभासइत्यर्थः प्रमाणानांस्वगोचरशून्यत्वात्स्वागोचरेप्रामाण्याभावोयुक्तएवे
तिभावः कुतर्कमेवाह किमीहइत्यादिना सधातापरमेश्वरस्त्रिभुवनंसृजतिइतिसिद्धांतमनूद्यत
त्रदूषणमाह खलुकिंतुकिमीहःकाईहाचेष्टायस्येतितथाकःकायःशरीरंकर्तृरूपंयस्येतिकिंकायः
कःउपायःसहकारिकारणमस्येतिकिमुपायः कआधारोऽधिकारणमस्येतिकिमाधारः किमुपादा

For Private and Personal Use Only

 

नंसमवायिकारणंभुवनाकारेणनिष्पाद्यमस्येतिकिमुपादानः सर्वत्रकिंशब्दआक्षेपे इतिशब्दःप्रकारा
र्थः चशब्दश्शंकांतरसमुच्चयार्थः कुलालोहि घटंकुर्वन्स्वशरीरेणव्याप्रियमाणेनचक्रभ्रमणादिचेष्ट
यासलिलसूत्राद्युपायेनचक्रादावाधारेमृदमुपादानभूतांघटाकारांकरोतिएवंजगत्कर्त्तापिवाच्यः त
थाचकुलालादिवदनीश्वरएवेत्यभिप्रायः घटादिदृष्टांतेनखलुक्षित्यादेःसकर्तृकंसाध्यते तथाच

अतर्क्यैश्वर्येत्वय्यनवसरदुस्थोहतधियः कुतर्कोयंकांश्चिन्मुखरयतिमोहायजगतः ५

घटादिकर्त्तरि कर्तृत्वोपाधिकंयावत्दृष्टंक्षित्यादिकर्तर्यपि तावदवश्यंस्वीकर्तव्यंदृष्टांतस्यतुल्यत्वा
त् तथाचोभयतः पाशारज्जुः तदंगीकारेऽस्मदादितुल्यत्वादनीश्वरत्वंतदनंगीकारेचकर्तृत्वानुप
पत्त्याऽसिद्धिरेवेत्येवंरूपःकुतर्कइत्यर्थः सिद्धांतंवदन्कुतर्कंविशिनष्टि अनवसरदुःस्थःनास्त्यव
सरोऽवकाशोऽस्येत्यनवसरःअतएव दुस्थःदुष्टत्वेनस्थितः विचित्रनानाशक्तिमायावशेनसर्वनि- ७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्गातरि सर्वतर्कागोचरे त्वयि नास्ति कुतर्कावसर इत्यर्थः तथाचोक्तम् अचिंत्याः खलु ये भावा न तांस्त
र्केण योजयेदिति नच घटादि कर्त्तरि यावत् दृष्टं तावत् क्षित्यादि कर्त्तर्यपि साधनीयम् व्याप्तिं विना सा
मानाधिकरण्यमात्रस्यासाधकत्वात् अन्यथा महानसे धूमवह्न्योर्व्याप्तिग्रहणसमये व्यंजनादिमत्त्व
मपि दृष्टमिति पर्वतादावपि तदनुमानं स्यात् तस्मात्साधर्म्यसमा जातिरेषा स्वव्याघातकत्वादनुत्तरम्

अजन्मानो लोकाः किमवयववंतोपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति

परांक्रांतं चात्र सूरिभिरित्युपरम्यते हरिपक्षेप्येवम् ५ एवं प्रतिकूलतर्कं परिहृत्यानुकूलतर्कमुद्भा
वयन्स्तौति अजेति हे अमरवर सर्वदेवश्रेष्ठ अवयववंतोपि सावयवा अपि लोकाः क्षित्यादयः किं
अजन्मानः जन्महीनाः किंतु जन्या एवेत्यर्थः तेन सावयवत्वेन क्षित्यादेर्न जन्यत्वहेतोरसिद्धत्वम्
यावद्विकारं तु विभागो लोकवदिति न्यायात् स्वसमानसत्ताकभेदप्रतियोगित्वेनैव जन्यत्वनियमा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्च तथाजगतांक्षित्यादीनांभववविधिकृत्पत्तिक्रियाधिष्ठातारंकर्त्तारमनाहत्य अनपेक्ष्यकिंभवति अपे
क्ष्येवभवतीत्यर्थः तेनकार्यत्वसकर्तृकत्वयोरव्यभिचारान्नानैकांतिकत्वंहेतोः तथाऽनीशोवाईश्वराद
न्योवायदिकुर्यात्तर्हिभुवनजननेकःपरिकरःकासामग्री अनीश्वरस्यस्वशरीररचनामप्यजानतोविविक्त्वच
तुर्दशभुवनरचनाऽसंभवादीश्वरएवरचनांकरोतीत्यर्थः परिकरमितिपाठेकोवाऽनीश्वरोभुवनजननेप

अनीशोवाकुर्याद्भुवनजननेकःपरिकरोयतोमंदास्त्वांप्रत्यमरवरसंशेरतइमे ६

रिकरमारंभंकुर्यात् अपित्वीश्वरएवकुर्यादित्यर्थः एतेनार्थांतरतापरिहृता एवमनुमानदोषाननूद्यशंकि
तदोषांतरंनिराकुर्वन्नुपसंहरति यतइतियतएवंसर्वप्रमाणसिद्धस्त्वंअतस्त्वेमंदाः मूढानतुविद्वांसः इ
मेयेत्वांप्रतिसंशेरतेसंदेहवंतःकिमुतविपर्ययवंतइत्यर्थः जन्माद्यस्ययतइतिन्यायेनयतोवाइमानिभ
तानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतितद्ब्रह्म आनंदोब्रह्मेतिव्यजानादित्यादिश्रुति ८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रेवपरमेश्वरप्रमाणम् अनुमानंत्वनुकूलंतर्कमात्रम् श्रुतेर्नस्वातंत्र्येणप्रमाणमितिद्रष्टव्यम् हरिपक्षे
प्येवम् ६ एवंतावत्भगवद्विमुखान्निरस्यसर्वेषांशास्त्रप्रस्थानानांभगवत्येवतात्पर्यसाक्षात्परंपरया
वेतिवदन्स्तौति त्रयीति हेअमरवर नानासंकीर्णाःपंथानः नानापंथानः ऋजवश्चकुटिलाश्च ऋजु
कुटिलाः ऋजुकुटिलाश्चतेनानापथाश्चेति ऋजुकुटिलनानापथाः तान्जुषंतेभजंतीति तथातेषां

त्रयीसांख्यंयोगःपशुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदःपथ्यमितिच

नृणांअधिकार्यनधिकारिसाधारणानांतत्तत्साधनानुष्ठानैःसाक्षात्परंपरयात्वमेवएकोगम्यःप्रा-
प्यः नत्वन्यःकश्चिदित्यर्थः अत्रदृष्टांतमाह पयसामर्णवइव यथाऋजुपथजुषांगंगानर्मदादीनांसा
क्षादेवसमुद्रःप्राप्यः यथावाकुटिलपथजुषांयमुनाशरय्वादीनांगंगादिप्रवेशद्वारापरंपरया एवंवे
दांतवाक्यश्रवणमननादिनिष्ठानांसाक्षात्त्वंप्राप्यः अन्येषांतु अंतःकरणशुद्धितारतम्येनपरंपर

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यात्वमेवप्राप्यः चेतनत्वेनैवमोक्षयोग्यत्वात्परमात्मानमभ्युपगमादित्यर्थः ननुऋजुमार्गसतितंविहा
यकुटिलमार्गंभजंते ऋजुमार्गस्यैवशीघ्रफलदायित्वात् इत्यतआह प्रभिन्नेप्रस्थानेइदंपरंपथ्यम
दःपरंपथ्यमितिचरुचीनांवैचित्र्यात्तस्मिन्शास्त्रप्रस्थानेइदमेवश्रेष्ठमिदमेवममहितमितिइच्छावि
शेषाणामनेकप्रकारत्वात् प्रागभावीयत्तत्तत्कर्मवासनावशेनऋजुत्वकुटिलत्वनिश्चयासामर्थ्या

रुचीनांवैचित्र्यादृजुकुटिलनानापथजुषांनृणामेकोगम्यस्त्वमसिपयसामर्णव
इव ७

त् कुटिलेपिऋजुभ्रांत्याप्रवर्त्तंतइत्यर्थः प्रस्थानभेदमेवदर्शयति त्रयीसांख्यंयोगः
पशुपतिमतंवैष्णवमिति सर्वशास्त्रोपलक्षणमेतत् तथाहि त्रयीशब्देनवेदत्रयवाचिनातदुपल
क्षिताअष्टादशविद्याअप्यत्रविवक्षिताः तत्रऋग्वेदोयजुर्वेदःसामवेदोथर्ववेदइतिवेदाश्चत्वारः शि- ९
क्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमितिषडंगानिषट् पुराणानिन्यायोमीमांसाधर्मशास्त्रा

For Private and Personal Use Only

णिचेतिचत्वार्युपांगानि अत्रोपपुराणानामपिपुराणेष्वंतर्भावः वैशेषिकशास्त्रस्यन्याये वेदांतशा
स्त्रस्यमीमांसायां महाभारतरामायणयोःसांख्यपातंजलपाशुपतवैष्णवादीनांचधर्मशास्त्रेष्विति
मिलित्वाचतुर्दशविद्याः तथाचोक्तम् पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाःस्थानानिवि
द्यानांधर्मस्यचचतुर्दशइति एताएवचतुर्भिरुपवेदैःसहिताअष्टादशविद्याभवंति आयुर्वेदोधनु
र्वेदोगांधर्ववेदोःर्थशास्त्रंचेतिचत्वारउपवेदाः ताएताअष्टादशविद्यास्त्रयीसांख्यमित्यनेनोपन्य
स्ताः अन्यथान्यूनताप्रसंगात् सर्वेषांचास्तिकानामेतावंत्येवशास्त्रप्रस्थानानिअन्येषामप्येकदे-
शिनामेष्वेवांतर्भावात् ननुनास्तिकानामपिप्रस्थानांतराणिसंतितेषामेतेष्वनंतर्भावात् पृथग्ग
णयितुमुचितानि तथाहि शून्यवादेनैकंप्रस्थानंमाध्यमिकानाम् क्षणिकविज्ञानमात्रवादेना
परंयोगाचाराणाम् ज्ञानाकारानुमेयक्षणिकबाह्यार्थवादेनापरंसौत्रांतिकानाम् प्रत्यक्षस्वल
क्षणक्षणिकबाह्यार्थवादेनापरंवैभाषिकानाम् एवंसौगतानांप्रस्थानचतुष्टयं तथादेहात्मवादे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नैकंप्रस्थानंचार्वाकाणाम् एवंदेहातिरिक्तदेहपरिणामात्मवादेनद्वितीयंप्रस्थानंदिगंबराणाम् ए
वंमिलित्वानास्तिकानांषट्प्रस्थानानितानिकस्मान्नोच्यंते सत्यंवेदबाह्यत्वात्तुतेषांम्लेछादिप्रस्था
नवत्परंपरयापिपुरुषार्थानुपयोगित्वात् उपेक्षणीयत्वमेव इहचसाक्षाद्वापारंपरयावापुमर्थो
पयोगिनांवेदोपकरणानामेवप्रस्थानानांभेदोदर्शितोऽतोनन्यूनत्वशंकावकाशः अथसंक्षेपे-
णैषांप्रस्थानानांस्वरूपभेदहेतुःप्रयोजनभेदउच्यतेबालानांव्युत्पत्तये तत्रधर्मब्रह्मप्रतिपादक
मपौरुषेयंप्रमाणंवाक्यंवेदः सचमंत्रब्राह्मणात्मकः तत्रमंत्राअनुष्ठानकारकभूतद्रव्यदेवताप्र
काशकाः तेपित्रिविधाः ऋग्यजुःसामभेदात् तत्रपादबद्धगायत्र्यादिच्छंदोविशिष्टाऋचः अग्नि
मीळेपुरोहितमित्याद्याः ताएवगीतिविशिष्टाःसामानि तदुभयविलक्षणानियजूंषि अग्निनग्नी
न्विहरेदित्यादिसंबोधनरूपाणिनिगदसंज्ञामंत्राअपियजुरंतर्भूताइतिएव तदेवंनिरूपितामं
त्राः ब्राह्मणमपित्रिविधम् विधिरूपमर्थवादरूपंतदुभयविलक्षणंच तत्रशब्दभावनाविधिरि



For Private and Personal Use Only

निभाट्टाः नियोगोविधिरितिप्राभाकराः इष्टसाधनताविधिरितितार्किकादयः सर्वोविधिरपिचतु
र्विधः उत्पत्त्यधिकारविनियोगप्रयोगभेदात् तत्रदेवताकर्मस्वरूपमात्रभेदकोविधिरुत्पत्तिविधिः
आग्नेयोऽष्टाकपालोभवतीत्यादिः सेतिकर्त्तव्यताकस्यकरणस्ययागादेः फलसंबंधबोधकोविधि
रधिकारविधिर्दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यादिः अंगसंबंधबोधकोविधिर्विनियोगवि
धिः व्रीहिभिर्यजेतसमिधोयजतीत्यादिः सांगप्रधानकर्मप्रयोगैक्यबोधकः पूर्वविधित्रयमिल
नरूपः प्रयोगविधिः सचश्रौतइत्येकेकल्प्यइत्यपरे कर्मस्वरूपंचद्विविधम् गुणकर्मअर्थकर्म
च तत्रक्रतुकारकाश्रित्यविहितंगुणकर्म तदपिचतुर्विधम् उत्पत्त्याप्तिविकृतिसंस्कृ
तिभेदात् तत्रवसंतेब्राह्मणोऽग्नीन्आदधीतयूपंतक्षतीत्यादौआधानतक्षणादिनासंस्कारवि
शेषविशिष्टाग्नियूपादेरुत्पत्तिः स्वाध्यायोध्येतव्यः गांपयोदोग्धीत्यादावध्ययनदोहनादिना
विद्यमानस्यैवस्वाध्यायपयःप्रभृतेःप्राप्तिःसोममभिषुणोतिव्रीहीनवहंतिआज्यंविलापय-

तीत्यादौअभिषवावयातनिलापनैः सोमादीनांविकारः व्रीहीन्प्रोक्षतिपत्न्यवेक्षतइत्यादौप्रोक्षणा
वेक्षणादिभिःव्रीह्यादिद्रव्याणांसंस्कारः एतच्चतुष्टयंचांगमेव तथाक्रतुकारकाण्याश्रित्यविहितं
अथकर्म तच्चद्विविधंअंगंप्रधानंच अन्यार्थमंगंअनन्यार्थंप्रधानम् अंगमपिद्विविधंसंनिपत्यो
पकारकमारादुपकारकंच तत्रप्रधानस्वरूपनिर्वाहकंप्रथमंयथावहननप्रोक्षणादि फलोपका
रिद्वितीयं यथाप्रयाजादि एवंसंपूर्णांगसंयुक्तोविधिः प्रकृतिः विकलांगसंयुक्तोविधिर्विकृतिः
तदुभयविलक्षणोविधिर्दर्वीहोमः एवमन्यदप्यूह्यं तदेवंनिरूपितोविधिभागः प्राशस्त्यनिंदान्य
तरलक्षणयाविधिशेषभूतंवाक्यमर्थवादः सचत्रिविधः गुणवादोनुवादोभूतार्थवादश्चेति
तत्रप्रमाणांतरविरुद्धार्थबोधकोगुणवादः आदित्योयूपइत्यादिः प्रमाणांतरप्राप्तार्थबोध
कोऽनुवादः अग्निर्हिमस्यभेषजमित्यादिः प्रमाणांतरविरोधतत्प्राप्तिरहितार्थबोधकोभूता
र्थवादः इंद्रोवृत्रायवज्रमुदयच्छदित्यादिः तदुक्तंविरोधेगुणवादःस्यादनुवादोऽवधारिते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूतार्थवादस्तद्धानादर्थवादस्त्रिधामतङ्इति तत्रत्रिविधानामप्यर्थवादानांविधिस्तुतिपरत्वेसमाने
पिभूतार्थवादानांस्वार्थेपिप्रामाण्यम् देवताधिकरणन्यायात् अबाधिताज्ञातार्थज्ञापकत्वंहिप्रामा
ण्यम् तच्चबाधितविषयत्वात्ज्ञापकत्वाच्चनगुणवादानुवादयोःभूतार्थवादस्यतुस्वार्थेतात्पर्यर
हितस्याप्यौत्सर्गिकंप्रामाण्यंनविहन्यते तदेवंनिरूपितोर्थवादभागः विध्यर्थवादोभयविलक्षणं
तुवेदांतवाक्यंतच्चाज्ञातज्ञापकत्वेप्यनुष्ठानाप्रतिपादकत्वान्नविधिःस्वतःपुरुषार्थपरमानंदज्ञाना
त्मकब्रह्मणिस्वार्थेउपक्रमोपसंहारादिषड्विधतात्पर्यलिंगवत्तयास्वतःप्रमाणभूतसर्वानपिवि
धीनंतःकरणशुद्धिद्वारास्वशेषतामापादयदन्यशेषत्वाभावाच्चनार्थवादः तस्मादुभयविलक्ष
णमेववेदांतवाक्यम् तच्चक्वचिदज्ञातज्ञापकत्वमात्रेणाविधिरितिव्यपदिश्यते विधिपदराहि
तप्रमाणवाक्यत्वेनचक्वचिद्भूतार्थवादइतिव्यवह्रियतइतिनदोषः तदेवंनिरूपितंत्रिविधंब्राह्म
णम् एवंचकर्मकांडब्रह्मकांडात्मकोवेदोधर्मार्थकाममोक्षहेतुः सचप्रयोगत्रयेणयज्ञनिर्वाहार्थमृग्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जुःसामभेदेनभिन्नः तत्रहौत्रप्रयोगऋग्वेदेन आध्वर्यवप्रयोगोयजुर्वेदेन औद्गात्रप्रयोगःसामवे
देन ब्राह्मयजमानप्रयोगौत्वत्रैवांतर्भूतौ अथर्ववेदस्तुयज्ञानुपयुक्तः शांतिकपौष्टिकाभिचारि
कादिकर्मप्रतिपादकेनात्यंतविलक्षणएव एवंप्रवचनभेदात्प्रतिवेदंभिन्नाभूयस्यःशाखाः एवंच
कर्मकांडेव्यापारभेदेपिसर्वासांवेदशाखानामेकरूपत्वमेवब्रह्मकांडइतिचतुर्णांवेदानांप्रयोजन
भेदेनभेदउक्तः अथांगानामुच्यते तत्रशिक्षायाउदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिविशिष्टस्व
रव्यंजनात्मकवर्णोच्चारणविशेषज्ञानंप्रयोजनंतदभावेमंत्राणामनर्थकफलत्वात् तथाचोक्तम्
मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह सवाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्व
रतोपराधादिति तत्रसर्ववेदसाधारणीशिक्षाः अथशिक्षांप्रवक्ष्यामीत्यादिपंचखंडात्मिकापाणिनि
नाप्रकाशिता प्रतिवेदशाखंचभिन्नरूपाःप्रातिशाख्यसंज्ञिताः अन्यैरपिमुनिभिःप्रदर्शिताः एवंवै १२
दिकपदसाधुत्वज्ञानेनोह्यादिकंव्याकरणस्यप्रयोजनंतच्चवृद्धिरादैजित्याद्यध्यायाष्टकात्मकंमहे

For Private and Personal Use Only

श्वरप्रसादेनभगवतापाणिनिनैवप्रकाशितम् तत्रकात्यायनेनमुनिनापाणिनीयसूत्रेषुवार्त्तिकं
विरचितम् तद्वार्तिकोपरिचभगवतापतंजलिनामहाभाष्यमारचितम् तदेतत्त्रिमुनिव्याकरणंवे
दांगंमाहेश्वरमित्याख्यायते कौमारादिव्याकरणानितुनवेदांगानिकिंतुलौकिकप्रयोगमात्रज्ञाना
र्थानीत्यवगंतव्यम् एवंशिक्षाव्याकरणाभ्यांवर्णोच्चारणेपदसाधुत्वेचज्ञातेवैदिकमंत्रपदानामर्थ
ज्ञानाकांक्षायांतदर्थंभगवतायास्केनसमाम्नायःसमाम्नातःसव्याख्यातव्यइत्यादित्रयोदशाध्या
यात्मकंनिरुक्तमारचितम् तत्रचनामाख्यातनिपातोपसर्गभेदेनचतुर्विधंपदजातंनिरूप्यवैदिक
मंत्रपदानामर्थःप्रदर्शितः मंत्राणांचानुष्ठेयार्थप्रकाशनद्वारेणोपकरणत्वात्पदार्थज्ञानाधीनत्वाच्च
वाक्यार्थज्ञानस्यमंत्रस्थपदार्थज्ञानायनिरुक्तमवश्यमपेक्षितंअन्यथाऽनुष्ठानासंभवात् सृण्येवजर्भ
रीतुर्फरीतूनइत्यादीनामतिदुरूहाणांप्रकारांतरेणार्थज्ञानस्यासंभावनीयत्वाच्च एवंनिघंटवोपिवै
दिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मकानिरुक्तांतर्भूताएव तत्रापिनिघंटुसंज्ञकःपंचाध्याया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्मकोग्रंथोभगवतायास्केनैवकृतः एवंऋङ्मंत्राणांपादबद्धच्छंदोविशेषविशिष्टत्वात्तद्ज्ञानेचनिंदाश्र
वणात् छंदोविशेषनिमित्तानुष्ठानविशेषविधानाच्च छंदोज्ञानाकांक्षायांतत्प्रकाशनायधीश्रीरस्त्रीमित्या
द्यष्टाध्यायात्मिका छंदोवि वृत्ति र्भगवतापिंगलेनविरचिता तत्राद्यलौकिकमित्यंतेनाध्यायत्रयेण
गायत्र्युष्णिगनुष्टुप्बृहती पंक्तित्रिष्टुप्जगतीतिसप्तछंदांसिसर्वाणिसांतरभेदानि प्रसंगान्निरूपिता
नि अथलौकिकमित्यारभ्याध्यायपंचकेनपुराणेतिहासादावुपयोगीनिलौकिकानिच्छंदांसिप्रसंगा
न्निरूपितानिव्याकरणेलौकिकपदनिरूपणवत् एवंवैदिककर्मांगदेशादिकालज्ञानायज्योतिषं
भगवतादित्येन गर्गादिभिश्चप्रणीतंबहुविधमेव एवंशाखांतरीयगुणोपसंहारेणवैदिकानुष्ठानक्र
मविशेषज्ञानायकल्पसूत्राणि तानिचप्रयोगत्रयभेदात्त्रिविधानि तत्रहौत्रप्रयोगप्रतिपादकानिआ
श्वलायनसांख्यायनादिप्रणीतानि आध्वर्यवप्रयोगप्रतिपादकानिबौधायनापस्तंबकात्यायना
दिप्रणीतानि औद्गात्रप्रयोगप्रतिपादकानिलाट्यायनद्राह्यायणादिभिःप्रणीतानि एवंनिरूपि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तः षण्णामंगानां प्रयोजनभेदः चतुर्णामुपांगानामधुनोच्यते तत्रसर्गप्रतिसर्गवंशमन्वंतरवंशा
नुचरितप्रतिपादकानिभगवताबादरायणेनकृतानिपुराणानितानिचब्राह्मंपाद्मंवैष्णवंशैवंभा
गवतंनारदीयंमार्कंडेयमाग्नेयंभविष्यंब्रह्मवैवर्त्तंलैंगंवाराहंस्कांदंवामनंकौर्मंमात्स्यंगारुडंब्र-
ह्मांडंचेत्यष्टादश एवमुपपुराणान्यप्यनेकप्रकाराणिद्रष्टव्यानि न्यायआन्वीक्षिकीपंचाध्यायी
गौतमेनप्रणीता प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडा
हेत्वाभासछलजातिनिग्रहस्थानाख्यानांषोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्वज्ञानंत-
स्यप्रयोजनंएवंदशाध्यायंवैशेषिकशास्त्रंकणादेनप्रणीतम् द्रव्यगुणकर्मसामान्यविशेषस
मवायानांषण्णांभावपदार्थानामभावसप्तमानांसाधर्म्यवैधर्म्याभ्यामुत्पादनंतस्यप्रयोजनंए
तदपिन्यायपदेनोक्तम् एवंमीमांसापिद्विविधाकर्ममीमांसाशारीरकमीमांसाच तत्रद्वादशा
ध्यायीकर्ममीमांसा अथातोधर्मजिज्ञासेत्यादिरन्वाहार्येचदर्शनादित्यंताभगवताजैमिनिना

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रणीता तत्र धर्मप्रकरणं१ धर्मभेदाभेदौ२ शेषशेषिभावः३ क्रत्वर्थपुरुषार्थभेदेनप्रयुक्तिविशेषः४ श्रुत्य
र्थपाठनादिक्रमभेदः५ अधिकारविशेषः६ सामान्यातिदेशः७ विशेषातिदेशः८ ऊहः९ बाधः१० तंत्रं
११ प्रसंगश्चेति १२ क्रमेणद्वादशानामध्यायानामर्थाः तथासंकर्षणकांडमपि अध्यायचतुष्टयात्मकंजै
मिनिनाप्रणीतंतच्चदेवताकांडसंज्ञयाप्रसिद्धमप्युपासनाख्यकर्मप्रतिपादकत्वात्कर्ममीमांसान्तर्ग
तमेव तथाचतुरध्यायीशारीरकमीमांसाऽथातोब्रह्मजिज्ञासेत्यादिरनावृत्तिःशब्दादित्यंताजीव-
ब्रह्मैकत्वसाक्षात्कारहेतुश्रवणाख्यविचारप्रतिपादकान्यायानुपदर्शयंतीभगवताबादरायणेनक्त
ता तत्रसर्वेषामपिवेदांतवाक्यानांसाक्षात्परंपरयावाप्रत्यगभिन्नाद्वितीये ब्रह्मणि तात्पर्यमितिस
मन्वयः प्रथमाध्यायेनप्रदर्शितः तत्रचप्रथमपादेस्पष्टब्रह्मलिंगयुक्तानि वाक्यानिविचारितानि द्वि
तीयपादेत्वस्पष्टब्रह्मलिंगयुक्तानिउपास्यब्रह्मविषयाणि तृतीयपादेअस्पष्टब्रह्मलिंगानिप्रायशो १४
ज्ञेयब्रह्मविषयाणि एवंपादत्रयेणवाक्यविचारः समापितः चतुर्थपादेतुप्रधानविषयत्वेनसंदिग्ध

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मानान्यव्यक्ताजादिपदानिचिंतितानि एवंवेदांतानामद्वये ब्रह्मणि सिद्धसमन्वयेतन्नसंभावितस्मृतित
र्कादिविरोधमाशंक्यतत्परिहारःक्रियतइत्यविरोधोद्वितीयाध्यायेनदर्शितः तत्राद्यपादेसांख्ययो
गकाणादादिस्मृतिभिःसांख्यादिप्रयुक्तैस्तर्कैश्चाविरोधोवेदांतसमन्वयस्यपरिहृतः द्वितीयेपादेसां
ख्यादिमतानांदुष्टत्वंप्रतिपादितम् स्वपक्षस्थापनपरपक्षनिराकरणरूपपक्षद्वयात्मकत्वाद्विचार
स्य तृतीयेपादेमहाभूतसृष्ट्यादिश्रुतीनांपरस्परविरोधःपूर्वभागेनपरिहृतः उत्तरभागेनतुजीवविष
याणाम् चतुर्थपादेइंद्रियविषयश्रुतीनांविरोधपरिहारः तृतीयाध्यायेसाधननिरूपणम् तत्रप्रथ
मपादेजीवस्यपरलोकगमननिरूपणेनवैराग्यंनिरूपितम् द्वितीयपादेपूर्वभागेनत्वंपदार्थःशोधि
तः उत्तरभागेनतत्पदार्थः तृतीयपादेनिर्गुणेब्रह्मणिनानाशाखापठितोपुनरुक्तपदोपसंहारःकृ
तः प्रसंगाच्चसगुणविद्यासुशाखांतरीयगुणोपसंहारानुपसंहारौनिरूपितौ चतुर्थपादेनिर्गुण
ब्रह्म विद्यायाबहिरंगसाधनानिआश्रमयज्ञादीन्यंतरंगसाधनानिशमदमनिदिध्यासनादीनिच

For Private and Personal Use Only

निरूपितानि चतुर्थेध्यायेसगुणनिर्गुणविद्ययोःफलविशेषनिर्णयःकृतः तत्रप्रथमपादेश्रवणाद्या
वृत्त्यानिर्गुणंब्रह्मउपासनावृत्त्यासगुणंवाब्रह्मसाक्षात्कृत्यजीवतःपापपुण्यालेपलक्षणाजीवन्मु
क्तिरभिहिता द्वितीयपादेम्रियमाणस्योत्क्रांतिकप्रकारश्चिंतितः तृतीयपादेसगुणब्रह्मविदोमृ
तस्योत्तरमार्गोभिहितः चतुर्थपादेपूर्वभागेननिर्गुणब्रह्मविदोविदेहकैवल्यप्राप्तिरुक्ताउत्तरभा
गेनसगुणब्रह्मविदोब्रह्मलोकेस्थितिरुक्तेति इदमेवसर्वशास्त्राणांमूर्द्धन्यंशास्त्रांतरंसर्वमस्यैव
शेषभूतंइतीदमेवमुमुक्षुभिरादरणीयंश्रीशंकरभगवत्पादोदितप्रकारेणेतिरहस्यम् एवं
धर्मशास्त्राणिमनुयाज्ञवल्क्ययमांगिरोवसिष्ठदक्षसंवर्त्तशातातपपराशरगौतमशंखलि-
खितहारीतापस्तंबोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतयस्तैः कृ
तानिवर्णाश्रमधर्मविशेषाणांविभागेनप्रतिपादकानि एवंव्यासकृतंमहाभारतंवाल्मी १५
किकृतंरामायणंचधर्मशास्त्रएवांतर्भूतंस्वयमितिहासत्वेनप्रसिद्धम् सांख्यादीनांध

र्मशास्त्रांतर्भावेपिइह स्वशब्देनैवनिर्देशात्पृथगेवसंगतिर्वाच्या अथवेदचतुष्टयस्यक्रमेणचत्वा
रउपवेदाः तत्रायुर्वेदस्याष्टौस्थानानिभवंति सूत्रंशारीरमैंद्रियंचिकित्सानिदानंविमानंकल्पःसि
द्धिश्चेति ब्रह्मप्रजापत्यश्विधन्वंतरींद्रभरद्वाजात्रेयाग्निवेश्यादिभिरुपदिष्टश्चरकेणसंक्षिप्तः
तत्रैवसुश्रुतेनपंचस्थानात्मकंप्रस्थानांतरंकृतंएवंवाग्भट्टादिभिरपिबहुधातिनशास्त्रभेदः का
मशास्त्रमप्यायुर्वेदांतर्गतमेवसुश्रुतेनवाजीकरणाख्यकामशास्त्राभिधानात्तत्रवात्स्यायने
नपंचाध्यायात्मकंकामशास्त्रंप्रणीतं तस्यचविषयवैराग्यमेवप्रयोजनंशास्त्रोद्दीपितमार्गेणा
पिविषयभोगेदुःखमात्रपर्यवसानात् चिकित्साशास्त्रस्यरोगतत्साधनरोगनिवृत्तितत्साधनज्ञा
नंप्रयोजनम् एवंधनुर्वेदःपादचतुष्टयात्मकोविश्वामित्रप्रणीतः तत्रप्रथमोदीक्षापादः द्वितीयः
संग्रहपादः तृतीयःसिद्धिपादःचतुर्थःप्रयोगपादः तत्रप्रथमपादेधनुर्लक्षणंअधिकारिनिरूप
णंचकृतं तत्रधनुःशब्दश्चापेरूढोपिचतुर्विधायुधवाचीवर्त्तते तच्चचतुर्विधंमुक्तममुक्तंमुक्ता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुक्तंयंत्रमुक्तंच तत्रमुक्तंचक्रादिअमुक्तंखड्गादिमुक्तामुक्तंशल्यावांतरभेदादि यंत्रमुक्तंशरादि
तत्रमुक्तमस्त्रमित्युच्यतेअमुक्तं शस्त्रमित्युच्यते तदपिब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादि
भेदादनेकविधंएवंसाधिदैवतेषुसमंत्रेषुचतुर्विधायुधेषुयेषामधिकारः क्षत्रियकुमाराणांतदनु
यायिनांचतेसर्वेचतुर्विधाः पदातिरथगजतुरगारूढाः दीक्षाभिषेकशकुनमंगलकरणादिकंचस
र्वमपिप्रथमपादेनिरूपितम् सर्वेषांशस्त्रविशेषाणामाचार्यस्यचलक्षणपूर्वकंसंग्रहणप्रका
रोदर्शितःद्वितीयेपादे गुरुसंप्रदायसिद्धानांशस्त्रविशेषाणांपुनःपुनरभ्यासोमंत्रदेवतासिद्धिक
रणमपिनिरूपितंतृतीयपादे एवंदेवतार्चनाभ्यासादिभिःसिद्धानामस्त्रविशेषाणांप्रयोगश्च
तुर्थपादेनिरूपितः क्षत्रियाणांस्वधर्माचरणंयुद्धंदुष्टदस्युचौरादिभ्यःप्रजापालनंचधनुर्वेदस्य
प्रयोजनम् एवंगांधर्ववेदशास्त्रंभरतेनप्रणीतम् तत्रनृत्यगीतवाद्यभेदेनबहुविधोऽर्थःप्रपंचि
तः दैवताराधननिर्विकल्पकसमाध्यादिसिद्धिश्चगांधर्ववेदस्यप्रयोजनम् एवमर्थशास्त्रंचबहु १६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विधंनीतिशास्त्रमश्वशास्त्रंगजशास्त्रंशिल्पशास्त्रंसूपकारशास्त्रंचतुःषष्टिकलाशास्त्रंचेति ताश्चतुः
षष्टीकलाश्चैवागमोक्ताः गीतं१ वाद्यं२ नृत्य३ नाट्यं४ आलेख्यं५ विशेषकछेद्यं६ तंडुलकुसुमबलिवि
काराः७ पुष्पास्तरणं८ दशनवसनांगरागाः९ मणिभूमिकाकर्म१० शयनरचनं११ उदकवाद्यं१२ उद
कवाद्यः १३ चित्रायोगाः१४ कर्णपत्रभंगा१८ गंधयुक्तिः१९ भूषणयोजनं२० ऐंद्रजालाः२१ कौकुमार
योगाः२२ हस्तलाघवं२३ चित्रप्रकाशापूपभक्तविकारक्रियाः२४ पानकारसरागासवयोजनं२५ सू
चीवामकर्म२६ सूत्रक्रीडा२७ वीणाडमरुकवाद्यानि२८ प्रहेलिकाप्रतिमालाः२९ दुर्वचकयोगाः३० पु
स्तकवाचनं३१ नाटकाख्यायिकादर्शनं३२ काव्यसमस्यापूरणं३३ पट्टिकावेत्रबाणविकल्पाः३४ तर्क
कर्माणि३५ तक्षणं३६ वास्तुविद्या३७ रूप्यरत्नपरीक्षा३८ धातुवादः३९ मणिरागज्ञानं४० आकारज्ञानं
४१ वृक्षायुर्वेदयोगाः४२ मेषकुक्कुटलावकयुद्धविधिः४३ शुकसारिकाप्रलापनं४४ उत्सादनं४५ केशमा
र्जनकौशलं४६ रसमुष्टिकाकथनं४७ म्लेच्छितकविकल्पाः४८ देशभाषाज्ञानं४९ पुष्पशकटिकानिमित्त

For Private and Personal Use Only

ज्ञानं ५० यंत्रमातृका ५१ धरणमातृका ५२ असंवाच्यमानसीकाव्यक्रियाविकल्पाः ५३ अभिधानकोशाः
५४ छंदोज्ञानं ५५ क्रियाविकल्पाः ५६ ललितविकल्पाः ५७ वस्त्रगोपनानि ५८ द्यूतविशेषः ५९ आकर्ष-
क्रीडा ६० बालक्रीडकानि ६१ वैनायकीविद्याज्ञानं ६२ वैजयिक विद्याज्ञानं ६३ वैयासिकीविद्याज्ञानं ६४
इतिचतुःषष्टीकलाः नानामुनिभिःप्रणीतं तत्सर्वं तस्यसर्वस्यच लौकिकालौकिकतत्तत्प्रयोजनभेदो
द्रष्टव्यः एवमष्टादशविद्यास्त्रयीशब्देनोक्तास्तथा सांख्यशास्त्रं कपिलेनभगवताप्रणीतम् अत्रत्रि
विधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थ इत्यादि षडध्यायं तत्रप्रथमेध्यायेविषयानिरूपिताः द्वि
तीयेध्यायेप्रधानकार्याणि तृतीयेध्यायेविषयवैराग्यं चतुर्थेध्यायेविरक्तानांपिंगलाकुमारादीनामा
ख्यायिकाः पंचमेध्यायेपरपक्षनिर्जयः षष्ठेसर्वार्थसंक्षेपः प्रकृतिपुरुषविवेकज्ञानं सांख्यशास्त्र-
स्यप्रयोजनम् तथायोगशास्त्रंभगवतापतंजलिनाप्रणीतम् अथयोगानुशासनमित्यादिपादच
तुष्टयात्मकं तत्रप्रथमेपादेचित्तवृत्तिनिरोधात्मकः समाधिरभ्यासवैराग्यरूपंचतत्साधनंनिरूपितं १७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वितीयेपादेविक्षिप्तचित्तस्यापिसमाधिसिद्ध्यर्थंयमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमा
धयोऽष्टावंगानिनिरूपितानि तृतीयपादेयोगविभूतयः चतुर्थपादेकैवल्यमितितस्यचविजातीयप्र
त्ययनिरोधद्वारेणनिदिध्यासनसिद्धिःप्रयोजनं तथापशुपतिमतंपाशुपतशास्त्रंभगवतापशुपति
नापशुपाशविमोक्षणायाथातःपाशुपतयोगविधिंव्याख्यास्यामइत्यादिपंचाध्यायविरचितं तत्रा
ध्यायपंचकेनापिकार्यरूपोजीवःपशुःकारणंपशुपतिरीश्वरः योगःपशुपतौचित्तसमाधानं विधि
र्भस्मनात्रिषवणस्नानादिर्निरूपितः दुःखांतसंज्ञकोमोक्षश्चास्यप्रयोजनं यतएवकार्यकारणयोग
विधिदुःखांताइत्याख्यायंते एवंचवैष्णवनारदादिभिःकृतंपंचरात्रं तत्रवासुदेवसंकर्षणप्रद्युम्ना
निरुद्धाश्चत्वारः पदार्थाःनिरूपिताःभगवान्वासुदेवःपरमेश्वरःसर्वःसर्वकारणं तस्मादुत्पद्यतेसंक
र्षणाख्योजीवस्तस्मान्मनःप्रद्युम्नस्तस्मादनिरुद्धोऽहंकारः सर्वेचैतेभगवतोवासुदेवस्यैवांशभूता
स्तदभिन्नाएवेति तस्यवासुदेवस्यमनोवाक्कायवृत्तिभिराराधनंकृत्वाकृतकृत्योभवतीत्यादिचनि

For Private and Personal Use Only

रूपितं तदेवंदर्शितःप्रस्थानभेदः सर्वेषांसंक्षेपेणत्रिविधएवप्रस्थानभेदः तत्रारंभवादः एकः परि
णामवादोद्वितीयःविवर्त्तवादस्तृतीयः पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवोद्व्यणुकादि
क्रमेणब्रह्मांडपर्यंतंजगदारभंते असदेवकार्यंकारणव्यापारादुत्पद्यतइतिप्रथमः तार्किकाणांमी
मांसकानांचसत्वरजस्तमोगुणात्मकप्रधानमेवमहदहंकारादिक्रमेणजगदाकारेणपरिणमते पू
र्वमपिसूक्ष्मरूपेणसदेवकार्यंकारणव्यापारेणाभिव्यज्यतइतिद्वितीयःपक्षः सांख्ययोगपाशुपतानां
ब्रह्मणःपरिणामोजगदितिवैष्णवाः स्वप्रकाशपरमानंदाद्वितीयंब्रह्मस्वमायावशान्मिथ्यैवजगदा
कारेणकल्प्यतइतितृतीयःपक्षःब्रह्मवादिनाम् सर्वेषांचप्रस्थानकर्तॄणांमुनीनांविवर्त्तवादपर्यवसा
नेनाद्वितीयेपरमेश्वरेएववेदांतप्रतिपाद्येतात्पर्यम् नहितेमुनयोभ्रांताःसर्वज्ञत्वात्तेषांकिंतुबहिर्वि
षयप्रवणानामापाततः परमपुरुषार्थेप्रवेशोनभवतीतिनास्तिक्यनिवारणायतैःप्रकारभेदाःप्रद
र्शिताः तत्रतेषांतात्पर्यमबुध्वावेदविरुद्धेप्यर्थेतेषांतात्पर्यमुत्प्रेक्षमाणास्तत्तन्मतमेवोपादेयत्वेन

गृह्णंतोजनाऋजुकुटिलनानापथजुषोभवंतीतिनसर्वेषामृजुमार्गएवप्रवेशोनवापर्यवसानेपि परमेश्वरप्राप्तिरंतः करणशुद्धिवशेनपश्चादृजुमार्गाश्रयणादेवेत्यर्थः हरिपक्षेप्येवम् ७ एवं सर्वशंकोद्धारेणहरिहरस्वरूपंनिरूप्यतदेवार्वाचीनपदस्थंस्तौति हेवरदतवपरिपूर्णपरमेश्वरस्यापिएतत्तंत्रोपकरणंतंत्रस्यकुटुंबधारणस्यउपकरणंसाधनम् तदेवाह महोक्षःमहानुक्षा

महोक्षःखट्वांगंपरशुरजिनंभस्मफणिनःकपालंचेतीयत्तववरदतंत्रोपकरणम्

रुद्रवृषभःखट्वांगंखट्वायाअवयवविशेषःकापालिकानांप्रसिद्धः परशुःटंकःकुठारोवा अजिनंचर्म भस्मपांशुः फणिनःसर्पाःकपालंमनुष्यशिरोस्थिचेतिसप्तकम् नन्वेवंदरिद्रस्त्वंमेपिकिंदास्यतीत्यतआह सुराइत्यादि सुरास्तुभवत्सेवयाभवद्भूप्रणिहितांभवतोभ्रूविक्षेपमात्रेणसमर्पितांतांतांअसाधारणीमृद्धिंसंपत्तिंदधतिधारयंति त्वमतिदरिद्रस्तवभृत्यास्तुसर्वेसुरास्त्वत्प्रसादात्स

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृद्धाइतिव्यतिरेकंतुशब्दआह योप्यन्यान्धनवतः करोतिस तदपेक्षयाधिकधनवान्भवतीतिप्रसिद्धम्
नन्वतर्हिशोपिकथंस्वयंमहोक्षादिमात्रपरिग्रहइत्यतआह नहीत्यादि हियस्मात्स्वआत्मनिस्वरूपे
चिदानंदघनेआरमत्याक्रीडतइतितथातंनभ्रमयतिनमोहयतिविषयमृगतृष्णा विषयाइंद्रिया
र्थाःशब्दस्पर्शरूपरसगंधास्तएवमृगतृष्णाजलबुद्ध्यागृह्यमाणामरीचिका यथामृगतृष्णारविरश्मि

स्फुरास्तातामृद्धिंदधतितुभवद्भूप्रणिहितांनहिस्वात्मारामंविषयमृगतृष्णाभ्रमयति ८

रूपाजलविरुद्धस्वभावापिभ्रांत्याजलमयीवाभासते तथाविषयाअपिदुःखरूपाभ्रांत्यासुखरूपा
आभासंतइतिरूपकार्थः यत्रजीवोपिस्वात्मारामतांप्राप्तोनविषयासक्तोभवतितत्रकिंमुवक्तव्यंनि
त्यमुक्तः परमेश्वरोविषयैर्नाभिभूयतइत्यभिप्रायः तेनवृषभारूढखट्वांगपरशुफणिकपालाल्लं १९
तचतुर्भुजाचर्मवसनाभस्मांगरागाफणिकपालविविधभूषणामाहेश्वरीमूर्तिर्गुरूपदेशेनज्ञाता



For Private and Personal Use Only

..त्यादिभिराराध्येत्यर्थः वस्तुतस्तु पुरुषप्रधानमहदहंकारतन्मात्रेंद्रियभूतानिमहोक्षादिरूपेणगु
णाभिमानवंतमीश्वरमुपासत इत्यागमप्रसिद्धम् तस्यजगत्कुटुंबस्यतत्त्वान्येवोपकरणमितिनिगर्वः
हरिपक्षेतु महोक्षः अक्षश्चक्रं अक्षोरथावयवकेचविभीतकेस्यादक्षाणिपंडितजनाविदुरिंद्रियाणि
इतिधरणिः महस्तेजोरूपं भस्मफणिनः भस्मवच्छुभ्रस्यकोमलांगस्यचफणिनः शेषस्य अजिनंशरी
रत्वक्खट्वांगशय्या तथाकपालंकंशिरःपाल्यतेऽनेनेतिकपालंशिरउपधानंतस्यैवभस्मफणिनोंगेक
श्चिद्दुक्षितावयवविशेषः अथवाकेनजलेनपाल्यतइतिकपालंपद्मंशंखोवा तस्मिन्पक्षेभस्मफणि
नोंगंअजिनंखट्वांगंपर्यंकस्थानीयंअजिनंचतदुपरिआस्तृतवस्त्रस्थानीयमितिबोद्धव्यम् तथापर
शुरितिपरशुरामावताराभिप्रायेणहेवरदएतावत्तवतंत्रोपकरणमित्यादिपूर्ववत् अथवाविषयमृ
गतृष्णावाऽभियोगतः कृष्णोपरक्तंप्रतिबिंबकल्पंव्यामोहयंत्यपिरामंअनंतसत्यज्ञानानंदात्मकत्वेन
योगिनांतदेवप्रतिबिंबकल्पंनमोहयतिनस्वावरणांशेनाभिभवति उपाधेःप्रतिबिंबपक्षपातित्वात्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हि· कीदृशीसा स्वात्मा स्वःसच्चिदानंदात्मकस्त्वमेवात्मास्वरूपंयस्याःसातथा त्वय्यध्यस्तासास्वसत्तास्फू टी·
२० र्तिप्रदंत्वांकथंव्यामोहयेदित्यर्थः अत्रापिचक्रादीनांभगवद्विभूतित्वंविष्णुपुराणादौप्रसिद्धम् ८ एवं
स्तुत्ययोर्हरिहरयोर्निर्गुणंसगुणंचस्वरूपंनिरूपितंसंप्रतिस्तुतेःप्रकारंनिरूपयन्स्तौति हेपुरमथन
तैःस्तुतिप्रकारैस्त्वांस्तुवन्नजिह्रेमिनाहंलज्जेविस्मितइवजातचमत्कारइव यथाकश्चिदद्भुतंदृष्ट्वा

ध्रुवंकश्चित्सर्वंसकलमपरस्त्वध्रुवमिदंपरोध्रौव्याध्रौव्येजगतिगदतिव्यस्तविषये

विस्मितस्तत्परवशत्वाल्लोकोपहासमगणयित्वाविचेष्टतेतथाहमपिस्तोतुमयंनजानातीतिजनोमांउ
पहसिष्यतीतिलज्जामगणयन्त्वत्स्तुतौप्रवृत्तोस्मीत्यर्थः तैःकैःप्रकारैरित्याह ध्रुवमित्यादि कश्चित्को
पिसांख्यपातंजलमतानुसारीसर्वंसमग्रंजगद्ध्रुवंजन्मनिधनरहितम् सदेवगदतिव्यक्तंवदतीत्यर्थः २०
नह्यसतःउत्पत्तिःसंभवतिनवासतोविनाशइत्याविर्भावतिरोभावमात्रमुत्पत्तिविनाशशब्दाभ्यामभि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लक्ष्यतेतेनपरमेश्वरोपितावन्मात्रस्येष्टेनत्वसतउत्पत्तिः सतोवाविनाशश्चेत्यभिप्रायः इतिसत्कार्यवा
दएकःपक्षः तथाऽपरोन्यः सुगतमतानुवर्तीसकलमिदमध्रुवंक्षणिकमितिगदति नहिसतःस्थिरत्वं
संभवति अर्थक्रियाकारित्वमेवसत्वम् तच्चसदर्थस्ये क्षणयोगेननविलंबेनउपपद्यते इत्येकस्मिन्
क्षणेसर्वार्थक्रियासमाप्तेरुत्तरक्षणेऽसत्वमेव तथाचपरमेश्वरस्यापिक्षणिकविज्ञानसंतानरूपत्वाद

समस्तेप्येतस्मिन्पुरमथनतोर्विस्मितइवस्तुवन्जिद्रेमित्यांनखलुननुधृष्टासुरवरताः

सावसतउत्पत्तेरिष्टेननतुसतःस्थिरत्वायेतिद्वितीयःपक्षः सर्वक्षणिकतावादलक्षणः तदुभयपक्षास
हिष्णुश्चपरस्तार्किकः समस्तेप्येतस्मिञ्जगतिध्रौव्याध्रौव्येनित्यत्वानित्यत्वेव्यस्तविषयेभिन्नधर्मवर्त्ति
नीगदति आकाशादिचतुष्कपृथिव्यादिचतुष्कपरमाणवश्चनित्याः आकाशकालदिगात्ममनःपृथि
व्यादिपरमाणवश्चनित्याइतिवा कार्यद्रव्याणिचानित्यानितथाचानित्यानामुत्पत्तिविनाशयोरिष्टे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





परमेश्वरोनतुनित्यानामपीत्यर्थः इत्येवंतृतीयःपक्षः तथात्वत्रिष्वप्येतेषुद्वैतांगीकाराददितीयसन्मात्र
रूपस्यपरमेश्वरस्यस्पर्शोपिनास्तीतिसोपाधिकसंकुचितैश्वर्यरूपेणस्तुतिः सर्वथालज्जाकरीत्यर्थः
तर्हिकिमितिनलज्जसइत्यतआह ननुअहोखलुनिश्चितंमुखरतावाचालताधृष्टानिर्लज्जा तथा
मुखरतेवलज्जामपहरतीत्यर्थः एवंसर्वप्रकारप्रवादवादकवादादीनामाभासत्वंउक्तंअद्वितीयवाद

तवैश्वर्यंयत्नाद्यदुपरिविरंचोहरिरधःपरिच्छेत्तुंयातावनलमनलस्कंधवपुषः

स्येवलज्जानास्पदत्वेनसत्यत्वमितिद्रष्टव्यम् एतच्चत्वमर्कस्त्वंसोमइत्यादौस्पष्टीकरिष्यते हरिपक्षे
प्येवम् तत्रपुरमथनशब्दःप्राग्व्याख्यातः ९ एवंश्लोकनवकेनस्तुतिसामग्रींनिरूप्यस्तुतौप्रस्तुता
यांसमस्तप्रभाववतामग्रेसरयोर्हरिविरंच्योरपित्वत्प्रसादादेवत्वत्साक्षात्कारइत्येवंनिरतिशयंमाहा-
त्म्यंप्रकटयन्स्तौति हेगिरिशतवानुवृत्तिःसेवाकिंनफलतिअपितुसर्वमेवफलति त्वत्साक्षात्कारप २१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्यंतंफलंददातीत्यर्थः तत्रान्वयव्यतिरेकाभ्यांकारणतांद्रढयितुंभगवदनुवृत्तिव्यतिरेकेफलव्यतिरे
कमाह यद्यस्मादनलस्कंधवपुषस्तेजःपुंजमूर्तेस्तवैश्वर्यंस्थूलंरूपंपरिच्छेत्तुंइयत्तयावधारयितुमु
परिविरंचिर्ब्रह्मा ऽधोऽस्तान्हरिः विष्णुःयत्नात्सर्वप्रयत्नेनयावद्भंतुंशक्तौतावद्यातोगतोअनलंनअलं
नपरिच्छेत्तुं समर्थावित्यर्थः यत्रस्थूलरूपमप्यपरिच्छेद्यंतत्र दूरेसूक्ष्मरूपपरिच्छेदसंभावना तेनत्व

ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंतस्थेताभ्यांतवकिमनुवृत्तिर्नफलति॥१०॥

दनुवृत्तिंविनाहरिविरंच्योःप्रसिद्धमहाप्रभावयोरपित्वंनविज्ञेयस्तत्रकावार्त्ताऽन्येषामितिव्यतिरेकमुक्त्वा
ऽन्वयमाह ततस्तस्मात्कारणात्स्वयत्नवैफल्यादनंतरंताभ्यांहरिविरिंचिभ्यां श्लाघन्हूङ्स्थाशपांज्ञी
प्स्यमानइतिचतुर्थीतयोर्ज्ञानायेत्यर्थः कीदृशाभ्यांभक्तिश्रद्धाभरगुरुगृणद्भ्याम् भक्तिरत्रकायिकी
सेवाश्रद्धाऽस्तिक्यबुद्धिस्तयोर्भरोतिशयस्तेनगुरुश्रेष्ठंनिरतिशयंयथातथागृणद्भ्यांस्तुवद्भ्यांवाचिकीं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेवांकुर्वद्भ्यां यद्गुिरुतरंभवतिशीलोच्चयादितत्पवनपर्जन्यादिभिर्नविक्रियामुपैतिलघुद्रव्यवत्त
थास्त्वतिरपिअतिगौरववतीशिलोच्चयादिस्थानीयापवनपर्जन्यस्थानीयैर्विघ्नैश्चालयितुंनशक्येति
गुरुशब्देनध्वनितं एवंरूपेणतवैश्वर्यंस्तुवद्भ्यांताभ्यांकिमित्याह स्वयंतस्थे स्वयमेवनतुतयोःप्रयत्ने
नतस्थेस्वमात्मानंप्रकाशयतिस्म अत्रतवैश्वर्यमितिकर्तृपदंद्रष्टव्यं प्रकाशनार्थेचात्मनेपदम् यद्वा
गृणद्भ्यामितिकर्त्तरितृतीया तस्थेस्थितंनिर्वृत्तमितिभावप्रत्ययः ततस्तयोर्निर्वृत्तावपिकिंतवानु
वृत्तिर्नफलत्यपितुफलत्येवेत्यर्थः तस्मादेवंहरिविरंचिभ्यामपित्वदनुवृत्त्यैवत्वंसाक्षात्कृतःकावा
र्त्ताऽन्येषामित्यन्वयउक्तः एवंत्वदनुवृत्तिरेवसर्वफलतीत्यन्वयव्यतिरेकाभ्यांदृढीकृतम् हरिपक्षे
तु गिरौगोवर्द्धनाख्येशेतेगोपीरमयन्नितिगिरिशःश्रीविष्णुः अथवागिरिंमंदरंश्यतितनूकरोतिक्षी
रोदंमथ्नन्नितिगिरिशः योजनिकापूर्ववत् हरिःसर्पःशेषःविरंचिशेषाभ्यामपित्वत्कृपयैव त्वंप्राप्तइति
पूर्ववत्सर्वं अत्रानिलइति क्वचित्पाठः सनसांप्रदायिकः तथाचान्यत्रोक्तं गोर्ध्वगम्यःसरसिजभु



For Private and Personal Use Only

वोनाप्यधः शार्ङ्गपाणेरासीदं तस्तवहुतवहस्कंधमूर्त्त्यास्थितश्चेति १० अथबलिरावणयोरस्फुरयोरपिभ
गवदनुग्रहं दर्शयन्स्तौति हेत्रिपुरहरस्थिरायानिश्चलायास्त्वभक्तेस्तवसेवायाःविस्फूर्जितमिदंप्रभा
वोयं किंविशिष्टायास्त्वद्भक्तेः शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः शिरांस्येवपद्मानि अर्थाद्रावण
स्यतेषांश्रेणीपंक्तिस्तयारचितः कल्पितःचरणांभोरुहयोः पादपद्मयोर्बलिरुपहारोयस्यांसातथारा

अयत्नादापाद्यत्रिभुवनमवैरव्यतिकरंदशास्योयद्बाहूनभृतरणकंडूपरवशान्

वणेनहिनवभिः शिरोभिःस्वकृतहस्तकृत्तैः शंभोरुपहारः कृतइतिपुराणप्रसिद्धं किंतद्विस्फूर्जितमित्य
तआह यत्दशास्योरावणोबाहून्विंशतिभुजान् कीदृशान् रणाययुद्धायकंडूःखर्जूरितिस्पृहेतियावत्
तयापरवशान् तदधीनानभृतधृतवान् रणकंडूर्हिरणेनैवनिवर्त्तते रणासंपत्त्याच सर्वदातत्कंडूरेव
तद्भुजेष्वितिभावः तर्हिरणंसंपाद्यकिमितिनतत्कंडूंनिवर्त्तयतीतिचेन्नप्रतिमल्लाभावादित्याह त्रि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भुवनंत्रैलोक्यंअवैरिव्यतिकरं नविद्यतेवैरस्यविरोधस्यव्यतिकरः कारणंदर्पादि यत्र तत्तथाआपाद्यसं
पाद्यत्रैलोक्यवर्त्तिनोवीरानिंद्रादीन्स्वदास्यंनीत्वाइत्यर्थः नदष्ययत्नादयत्नेनैव स्वयमेवरावणपराक्र
मंकृत्वासर्ववीराद्र्पादित्यक्तवंतइत्यर्थः तथाचानायासेनैवनिर्जितत्रिजगतोरावणस्यभुजानांकंडू
र्नैवशांतेत्येषशौर्यातिशयोभगवद्भक्तेरेवप्रभावइत्यर्थः आसाद्येतिक्वचित्पाठः तस्यप्राप्येत्यर्थः हरि

शिरःपद्मश्रेणीरचितचरणांभोरुहबलेःस्थिरायास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जितमिदं॥१॥

पक्षेतु त्रीणीजाग्रत्स्वप्नसुषुप्त्याख्यानिपुराणिभक्तानांजीवानांस्वसाक्षात्कारेणहरतीतित्रिपुरहरोवि
ष्णुः हेत्रिपुरहरमोक्षदायकविष्णो दशास्योयत्तादृशोभुजान्बाहून् अमृततत्त्वद्भक्तेरेवपूर्वकृतायाः
इदानींफलरूपेणपरिणममानाया अतएवस्थिराया अनेककल्पव्यवधानेपियावत्फलपर्यंतंस्था
यिन्यास्तवसेवायाविस्फूर्जितमिदंनान्यस्यप्रभावोयमित्यर्थः त्वदीयवैकुंठपुरद्वारपालस्यपार्षद २३

प्रवरस्यत्वदिछयैवासुरीयोनिमनुभवतोपिरावणस्यत्वद्भक्तिप्रभावादेवनिरतिशयंपौरुषमित्यर्थः तथा
चबलेःवैरोचनेःत्वद्भक्तेर्विस्फूर्जितमिदं यागशालायांत्वदागमत्वत्पाणितोयदानत्वच्चरणांबुजस्पर्श-
नादिएतत्सर्वंसूचयन्संबोधयति हेशिरःपद्मश्रेणीरचितचरणांभोरुह अत्रापिबलेरितिसंबध्यते
बलेःशिरएवपद्मश्रेणीपद्ममयीनिःश्रेणिकापादविक्षेपभूमिस्तस्यांरचितमर्पितंचरणांभोरुहंयेन
सातथा योगपद्मपीठेहिभगवच्चरणारविंदंतिष्ठतीतिशास्त्रप्रसिद्धेः भगवच्चरणारविंदाधारत्वे
नबलेःशिरोपिपद्मपीठत्वेननिरूपितम् शिरःशब्दस्यनित्यसापेक्षत्वाच्चअत्रासापेक्षसमासोनदो
षायदेवदत्तस्यगुरुकुलमितिवत् बलिनाखलुभगवद्वामनावतारप्रार्थनयापदत्रयमिताभूमि
र्देयेतिप्रतिज्ञातंतत्रपदद्वयेनैवसर्वस्मिन्जगतिभगवताक्रांतेस्वसत्यपालनायतृतीयपदस्थानं
स्वशिरएवबलिनादत्तंतच्चभगवतास्वपादांबुजेनावष्टब्धंइतिपुराणप्रसिद्धम् नत्वेतादृशःप्र
सादोब्रह्मादिभिरपिलब्धोस्तितस्माद्बलिकृतायास्त्वद्भक्तेरेवप्रभावोयमित्यर्थः ११ ७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवंबलिरावणयोर्भक्तिवशादनुग्रहंप्रदर्श्यतयोरेवदर्पवशान्निग्रहंप्रदर्शयन्स्तौति हेत्रिपुरहर
अमुष्यपूर्वश्लोकोक्तस्यरावणस्यप्रतिष्ठास्थितिः त्वयिअलसचालितांगुष्ठशिरसिसतिपातालेप्यल
भ्याआसीत् अलसंमंदंयथास्यात्तथाचलितंकंपितंअंगुष्ठशिरःअंगुष्ठाग्रंयेनसतथातस्मिन्चलित
मितिक्तस्वत्वंचकंपतेर्चलतेर्मित्वानुशासनात् तथाचतवांगुष्ठकंपनमात्रेणैवतस्यवीराभिमानि-

**अमुष्यत्वत्सेवासमधिगतसारंभुजवनंबलात्कैलासेपित्वदधिवसतौविक्रमयतः**

नोऽधःप्रवेशोशक्यप्रतीकारआसीदित्यर्थः अमुष्यकिंकुर्वतःत्वदधिवसतावपिकैलासेतवमंदिरे
पिस्फटिकगिरौभुजवनंभुजवृंदंविंशतिसंख्याकंबलाद्विक्रमयतः अतिशौर्येणव्यापारयतः इ
ममुत्पाद्यलंकायांनेष्यामीत्यभिप्रायेणभुजचेष्टांकुर्वतइत्यर्थः कीदृशंभुजवनंत्वत्सेवासमधिग
तसारं त्वत्सेवयासमधिगतःप्राप्तःसारोबलंयेनतत्तथा त्वत्प्रसादेनबलमासाद्यत्वद्गृहमुत्पाटय



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तीत्यहोक्तृतघ्नतामोऽस्यंचेत्यभिप्रायः एवंहिपुराणप्रसिद्धं भगवत्प्रसादासादितबलेनरावणेन स्वबलपरीक्षार्थंभगवन्निवासस्यापिकैलासस्योत्पाटनमारब्धम् ततश्चपार्वत्याभीतयाप्रार्थितोभगवान्कैलासस्याधोगमनार्थंअंगुष्ठमात्रेणशनैर्व्यापारयामास तावन्मात्रेणैवक्षीणबलोरावणःपातालंप्रविवेशपुनश्चभगवताकरुणयासमुद्धृतइति ननुभगवत्प्रसादाल्लब्धवरोरावणःकथंभगवं

अलभ्यापातालेप्यलसचलितांगुष्ठशिरसिप्रतिष्ठात्वय्यासीद्ध्रुवमुपचितोमुह्यतिखलः १२

तंतदानींविस्मृतवानित्यतआह ध्रुवंनिश्चितंउपचितःसन्खलःकृतघ्नोमुह्यतिकृतं विस्मरति स्वोपचयहेतुमपिनगणयतीत्यर्थः हरिपक्षेतुहिकैलासेकेलिःक्रीडासैवप्रयोजनमस्येतिकैलः कैलोऽसिःखड्गोयस्यसकैलासिः इच्छामात्रेणनिर्जितशत्रोरपितवक्रीडार्थमेवनंदकधारणमित्यर्थःअमुष्यबलेः त्वदधिवसतौत्वन्निवासेतवस्वत्वास्पदीभूतेपित्रेलोक्यंबलान्मदीयमि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दंत्रैलोक्यमितिस्वत्वाभिमानाद्भुजवनंहस्तोदकंविक्रमयतः ममस्वत्वत्यागपूर्वकमेवतस्यप्रति
ग्रहीतुः स्वत्वमुत्पादयामीत्यभिप्रायेणाभगवतः पाणाव्बुदकंयच्छतः कीदृशंभुजवनंत्वत्सेवयासमधि
गतःसारःसौभाग्यविशेषोयेनतत्तथा तवपाणिपद्मसंबंधेनातितरांशोभमानमुदकमित्यर्थः तथा
चस्वत्वास्पदीभूतंतत्स्वकीयमितिमत्वातुभ्यंददतोबलेर्महानेवापराधः त्वयातुपरमकारुणिके
नप्रतिज्ञातविक्रमत्रयमितभूमिदानेपितस्यासामर्थ्यमासाद्यतस्यमत्ततानिवृत्तयेयोग्यएवदंडः
कृतइत्याह त्वयिअलसचलितांगुष्ठशिरसिसतितस्यप्रतिष्ठास्थितिः पातालेप्यलभ्यासीत् काचा
र्तास्वर्गमर्त्ययोः अथवापातालेविद्यमानस्यापिबलेरिंद्रादिभिरपिअलभ्याप्रतिष्ठाकीर्त्तिरासीत् त
त्रसर्वदाभगवतःसन्निहितत्वादितिभावः अलसंसलीलंचलितःकंपितःअंगुष्ठःशिरसिअर्थाद्बले
र्येनतथातस्मिन् तृतीयविक्रमभूम्यर्थंबलिनाशिरसिप्रसारितेतत्रचत्वदीयपादांगुष्ठसंबंधमात्रे २५
णैवतस्यपातालप्रवेशोजातइत्यर्थः ध्रुवमुपचितइत्याद्यर्थांतरन्यासःपूर्ववत् अथवारवलो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यमस्करो बलिरुपचितः मुह्यति अतो मोहनिवृत्तये अपचितः कर्त्तव्य इति भगवतोभिप्रायवर्णनं यस्याहमनुगृह्णामि तस्य वित्तं हराम्यहमिति भगवद्वचनात् १२ पूर्वत्र भगवद्विषये समुन्नतयो र्बलिरावणयोरत्यंतमवनतिर्दर्शिता अधुना तत्रावनतयोरिंद्रबाणयोरत्यंतमुन्नतिं दर्शयन्हरि हरौ स्तौति यदिति सुत्राम्ण इंद्रस्य ऋद्धिं संपत्तिं परमोच्चैः सतीमपि अधश्चक्रे न्यक्कृतवान्बाणो ब

**यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः**

लिस्कतः कीदृशः परिजनविधेयत्रिभुवनः परिजनो दासस्तद्वद्विधेयं वश्यं त्रिभुवनं यस्य परिजनाना मपि विधेयं वश्यं त्रिभुवनं यस्येति वा सतथा उच्चैः सतीं यदधश्चक्रे तदन्यत्र चित्रमपि तस्मिन्बाणेन चि त्रं आश्चर्यं कीदृशे त्वच्चरणयोर्वरिवसितरि नमस्कर्त्तरि इंद्रसंपत्तेरप्यधःकरणं त्वन्नमस्कारस्य नप र्याप्तं फलं किं त्वेकदेशमात्रमित्याह नकस्या इति त्वयि विषये शिरसोऽवनतिर्नमस्क्रिया सा कस्येउ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्नत्येनभवत्यपितुसर्वासामेवोन्नतिंमोक्षपर्यंतांजनयितुंसमर्थाभवत्येवेत्यर्थः अवनतिरप्युन्नतिहे तुरित्यतिशयोक्तिसंकीर्णोयमर्थांतरन्यासः सर्वोत्कृष्टत्वमचिंत्यमहिमत्वंचभगवतःसूचयतिइति भावः हरिपक्षेतु हेपरमवरदस्वत्रामाइंद्रस्यबाणःशरएकोपिऋद्धिंसंपत्तिउच्चैरधोपिसतींत्रिभु- वनव्यापिनींचक्रेकृतवान् यत् तत्तस्मिन्सुत्राम्णि नतच्चित्रमित्यादिपूर्ववत् त्वत्प्रसादादेवसर्वान्सु

नतच्चित्रंतस्मिन्वरिवसितरित्वच्चरणयोर्नकस्याउन्नत्यैभवतिशिरसस्त्वय्यवनतिः१३

रानेकेनापिबाणेनजित्वात्रिभुवनराज्यंप्राप्तवानित्यर्थः अत्रबाणइतिशस्त्रमात्रोपलक्षणं कीदृशो बाणः परिजनवद्विधेयमायत्तंत्रिभुवनंयस्मात्सतथा शेषंपूर्ववत् १३ अधुनाकालकूटप्रलय जलयोःसंहारंदर्शयन्शंकरनारायणौस्तौति हेत्रिनयनविषंसमुद्रमथनोद्भूतंकालकूटाख्यंगर लंसंहृतवतःपीतवतस्तवकंठेयःकल्माषः कालिमासीत्सकालिमातवकंठेश्रियंशोभांनकुरुते-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिनअपितुकुरुतएवेत्यर्थः ननुभगवानतिशयितविशेषदर्शीमहानर्थहेतुंविषंकिमितिपीतवा
नित्यतआह अकांडइति अकांडेअसमयेब्रह्मांडक्षयोमहाप्रलयोविषोर्मिवेगात्संभावितःस्तस्माच्च
कितादेवासुराइंद्रबलिप्रभृतयस्तेषुकृपादयातयाविधेयस्यवश्यस्य अन्यस्यैतत्पानेसामर्थ्यंनास्ती
तिविश्वत्राणायविषंस्वयमेवपीतवानित्यर्थः ननुविषविकारात्कल्माषः कथंकंठेशोभांतनोती

अकांडब्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयनविषंसंहृतवतः

त्यतआह अहोइत्यादि अहोआश्चर्येभुवनभयभंगव्यसनिनःपरमेश्वरस्यविकारोपिश्लाघ्यःप्रशंस
नीयः भुवनस्यलोकस्यभयंत्रासस्तस्यभंगोनिरन्वयनाशःसएवसर्वमन्यद्विहायक्रियमाणत्वात्
व्यसनमस्यास्तीतितथातस्य तेनजगदुपकृतिकृतंदूषणमपिभूषणमेवेत्यर्थः हरिपक्षेतु हे
त्रिनयनत्रयाणांलोकानांनयनवत्सर्वावभासक तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः दिवीवच

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षरा तत्तमिति श्रुतेः अकांडे अकाले ब्रह्मांडक्षयो महाप्रलयः दैनंदिनप्रलयजलपूरवेगात्संभावित
स्तस्माच्चकिता ये देवासुराः स्वायंभुवमनुप्रभृतयस्तद्विषयकृपावशीकृतस्य तद्विषं जलं विषंक्ष्वेडं
विषं जलमित्यादिकोशात् तच्च प्रलयकालीनं यज्ञवराहरूपेणावगाह्य पंकीकृत्य शोषितवतः पंक
व्यामिश्रणेन यः कल्माषो मलिनिमास्ति कल्माषः स्तोतृभिर्वर्ण्यमानः अर्थात्स्तोतॄणां कंठे श्रियं शोभां

सकल्माषः कंठे तव न कुरुते न श्रियमहो विकारोपि श्लाघ्यो भुवनभयभंगव्यसनिनः १४

न कुरुत इति न अपितु कुरुत एवेत्यर्थः अर्थांतरन्यासः पूर्ववत् १४ अथ कामस्य जनिनिधने दर्शय
न्स्तौति असिद्धार्था इति हे ईश यस्य स्मरस्य विशिखाः बाणाः सदेवासुरनरे जगति देवासुरनरादिस
हिते त्रैलोक्ये जयिनः उत्सृष्टाः क्वचिदपि असिद्धार्था अकृतकार्या न निवर्त्तंते अपितु सिद्धार्था एव नित्यं
जयिन एव भवंति जयिन इति स्मरस्य वा विशेषणं नित्यं जयशीलस्येत्यर्थः स एतादृशपौरुषवानपि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मरः यथा अन्ये देवा ममजय्यास्तथाऽयमर्यातिइतरदेवतुल्यंत्वांपश्यन्स्मर्त्तव्यात्माऽभूत् स्मर्त्त
व्यः स्मरणीयः आत्माशरीरंयस्यसतथानष्टइत्यर्थः पश्यन्निति हेतौ शतृप्रत्ययः लक्षणहेतोच
धातुःस्मरणात् तद्वैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेइतिवत् तेनेतरदेवसाधारणत्वेनत्वदर्शन
मेवाव्यवधानेनविनाशहेतुः कावार्त्तापरिभवादेरितिभावः तत्रकैमुतिकन्यायमाह नहिइत्यादि

अप्रसिद्धार्थानैवक्वचिदपिसदेवास्मरनरेनिवर्त्ततेनित्यंजगतिजयिनोयस्यविशिखाः

हियस्माद्वशिषु जितेंद्रियेषुअन्येष्वपिपरिभवस्तिरस्कारः पथ्योहितोनभवतिस्वनाशायैवसंपद्य
तइतियावत् किंपुनःपरमवशिनांवरेपरमेश्वरेत्वयीत्यर्थः हरिपक्षेतु हेइतरस्मरसर्वविलक्ष
णदेवपूर्वंस्मर्त्तव्यात्मामृतोपिस्मरःकामस्त्वांपश्यन्नभूज्जातः त्वत्सकाशाज्जातइत्यर्थः पिता
खलुपुत्रंजातमात्रमवलोकयत्यतः पुत्रोपितमेवावलोकयति इतिपश्यन्नभूदित्यनेनजन्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनकभावोलभ्यते कथंजातः साधारणंतवतुल्यरूपंयथास्यात्तथा आत्मावैपुत्रनामासीदिति श्रुतेः तत्किंसर्वांशेनभगवत्तुल्यस्तथाचनतस्यप्रतिमाअस्ति यस्यनाममहद्यशः तत्तत्समश्चा भ्यधिकश्चविद्यतइत्यादिश्रुतिविरोधइत्याशंक्यवैलक्षण्यमाह नहीत्यादि वशिषुजितेंद्रियेषु ह्वियस्मात्स्मरोनपथ्यः नहितः तत्रहेतुः परिभवः परिभवत्यनर्थेयोजयतीतिपरिभवः कामः

सपश्यन्नीशत्वामितरस्करसाधारणमभूत्स्मरःस्मर्त्तव्यात्मानहि वशिषुपथ्यःपरिभवः१५

खलुसर्वेषांसंसारबंधहेतुः परमेश्वरस्तुसर्वेषांसंसारबंधस्यात्यंतोच्छेदहेतुरितिमहद्वैलक्षण्यमि- त्यर्थः असिद्धार्थाइत्यादिपूर्ववत् १५ अथजगद्रक्षणार्थंनर्त्तनावतरणंदर्शयन्स्तौति हेईशजगद्र क्षायैत्वंनटसिनृत्यसिसंध्यायांजगतिजिघांसंतंवरलब्धंतत्कालबलंमहाराक्षसंनिजतांडवेनमोहय सीत्यर्थः त्वंतुजगतांरक्षायैनटसिजगंतितुत्वत्तांडवेनसंशयितानिभवंतीत्याह महीत्यादि तवचरणा २८

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घातेनसहसासंशयपदं महीव्रजति तथाविष्णोःपदंअंतरिक्षं भ्राम्यद्भुजपरिघरुग्णग्रहगणं भुजाएव
परिघाःअतिस्फुरद्वृत्तपीवरदृढदीर्घत्वात्तैर्भ्राम्यद्भिर्भुजरूपपरिघैरुग्णाःपीडिताः ग्रहगणानक्षत्रस
मूहायत्रतत्तथा संशयपदं व्रजतीत्यर्थः तथाद्यौःस्वर्लोकःअनिभृताअसंवृतायाजटास्ताभिस्ताडि
तंतटंप्रांतदेशोयस्याःसातथा मुहुर्दौस्थ्यंदुःस्थत्वंयाति एवंचक्रमेणत्रयाणांलोकानामपिसंशयोदर्शि

महीपादाघाताद्व्रजतिसहसासंशयपदंपदंविष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्

तः नन्वसौसर्वज्ञोप्यपायमपर्यालोचयन्नेवकिमित्येवंविधतांडवेप्रवृत्तइत्यतआह नन्विति नन्व
होविभुतापरममहत्ताप्रभुतेतियावत् वामैवप्रतिकूलेव अनुकूलमाचरत्यपिकिंचित्प्रतिकूलमाच
रंतीत्येवशब्दार्थः दृश्यतेहिस्वल्पकेपिराजनिस्वदेशरक्षणायसैनयांसहसंचरतिस्वदेशोपद्रवःकि
मुतत्वादृशेमहेश्वरइत्यर्थः हरिपक्षेतु हेईशत्वंजगद्रक्षायैनटसिनटवदाचरसि नटशब्दादा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चारंर्थेक्विपिप्रत्ययलोपेन टसीतिरूपं मत्स्यादिभूमिकांभजसीत्यर्थः कस्यामवस्थायांजगद्रक्षणार्थ
मवतरणमित्युच्यते महीपादित्यादि महींपातीतिमहीपोराजातस्मा दाघातात्सामहीसह समकाल
मेवसंशयपदंव्रजति आसमंताद्घातोनाशोस्मादित्याघातोहिंस्रः तथाचयदेवहिंस्रस्यराज्यंतदेवसंक
टंव्रजतीत्यर्थः तथाविष्णोःपदमधिष्ठानंयत्रभगवान्विष्णुःस्वविभूतिभिःसहपूज्यतेतद्विष्णोःपदंदेव

मुहुर्द्योर्दौस्थ्यंयात्यनिभृतजटाताडिततटाजगद्रक्षायेत्वंनटसिननुवामेवविभुता १६

यजनाख्ययज्ञशालादि तत्कीदृशंभ्राम्यद्भिर्भुजस्थपरिघैर्भुजरूपपरिघैरिवारुग्णोग्रहगणः सवित्रा
दिरूपःसोमपात्रसमूहोयत्रतत्तथा यागादिशुभकर्माणियदाध्वंस्यंतेतदेत्यर्थः तथाद्योर्दौस्थ्ययाः
ति अनिभृतजटाः पाषंडव्रतचिन्हभूतास्ताभिराताडितंअभावमिवगमितंतटंतुंगंपदंसत्यलोकं २९
यस्याःसातथा पाखंडिभिर्हिवैकुंठलोकोनांगीक्रियतेकिंपुनरिंद्रादिलोकइत्यर्थः यदाचैवंतदात्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नटवदाचरसीत्यर्थः तथाचभगवद्वचनगीतासु यदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्था
नमधर्मस्यतदात्मानंसृजाम्यहमिति श्रीभागवतेच यर्ह्यालयेष्वपिसतांनकथाहरेःस्युःपारवंडिनोद्वि
जजनावृषलानृदेवाः स्वाहास्वधावषडितिस्मगिरोनयत्रशास्ताभविष्यतिकलेर्भगवान्युगांतेइत्या
दि नन्विच्छामात्रेणैवजगंतिरक्षितुंक्षमोपिकिंमत्स्यादिरूपैःक्लिश्यतीत्यतआह नन्वित्यादि ननु

वियद्व्यापीतारागणगुणितफेनोद्गमरुचिःप्रवाहोवारांयःपृषतलघुदृष्टःशिरसिते

निश्चितंविभुताविभववत्तासंपन्नतेतियावत् वामेववक्रेव सत्यपृ ज्ञौप्रकारेवक्रेणैवप्रकारेणस्वस
पत्तिंसफलयितुंसंपन्नःकार्यंकरोतीत्यर्थः तेनाष्टविधमैश्वर्यमात्यंयिकंदर्शयन्भक्तानांअभिध्याना
यतानितानश्रवणमनोहराणिचरितानितेनतेनावतारेणधत्तेभगवानितिभावः १६ अथगंगाया
उद्धरणधारणेदर्शयन्हरिहरोस्तौति हेईशअनेनैवलिंगेननवादिव्यंदिविभवंदिव्यंसर्वदेवनियंत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वपुःशरीरंधृतमहिमसर्वेभ्योमहत्तरंउन्नेयंऊहनीयं तववपुषःसर्वमहत्तरत्वमेतावतापिनिश्चेतुंश
क्यंकिंप्रमाणांतरमात्रापेक्षितव्यमितिएवकारार्थः इतिशब्दःप्रकारार्थेएवंप्रकारेणलिंगेनेत्यर्थः त
मेवप्रकारंदर्शयति वियदित्यादि वियदाकाशंव्याप्नोत्याच्छादयतीतितथा तारागणेननक्षत्रवृंदे
नस्वांतःपतिनागुणिताशुभ्रत्वादिगुणसजातीयत्वाद्वर्द्धितापेनोद्गमरुचिर्यस्यसतथा एतादृशोवा

जगद्वीपाकारंजलधिवलयंतेनकृतमित्यनेनैवोन्नेयंधृतमहिमदिव्यंतववपुः १७

रांप्रवाहःसतवशिरसिपृषतलघुदृष्टःपृषताद्बिंदोरपिलघुरल्पतरःपृषतलघुःसएवदृष्टःआलोकि
तः तेनतुवारांप्रवाहेणजलधिवलयंजगद्वीपाकारंकृतं जलधीनांवृंदंजगद्भूलोकोद्वीपाकारंजंबु
द्वीपादिसप्तकरूपंयस्मिंस्तत्तथाविहितं अगस्त्येनहिसप्तसुसमुद्रेषुपीतेषुपुनर्भगीरथानीतगं ३०
गाप्रवाहेणैवतेषांपूरणंजातमितिपुराणप्रसिद्धम् तथाचयोजलराशिस्तवशिरसिबिंदोरप्यल्पो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृष्टः सएवान्तरिक्षयान्मंदाकिनीनाम्नावियद्व्याप्यास्ते क्षित्याभागीरथीतिगंगेतिचप्रसिद्धोभूलोकेससप्तसमु
द्रानापूर्यास्ते क्षित्यांस्तुभोगवतीतिसंज्ञयापातालमभिव्याप्यास्तइत्यनेनतवदिव्यवपुषोमहत्त्वम
नुमीयतइत्यर्थः हरिपक्षेतु तारागणैर्गुणिताःफेनाःयस्याःसातारागणगुणितफेनागंगातस्याउ
द्गमेउद्भवेरुचिःशोभायस्यसनतथा शिरसिसर्वलोकानांशिरःस्थानीयेब्रह्मलोकेबलिच्छलनोत्क्षि

रथःक्षोणीयंताशतधृतिरगेंद्रोधनुरथोरथांगेचंद्रार्कौरथचरणपाणिःशरइति

प्तचरणांगुष्ठनिर्मितब्रह्मांडविवरादागतोगंगोत्पत्तिहेतुर्वियद्व्यापकोयोवाराप्रवाहःसतेत्वयापृषत
लघुदृष्टःबिंदोरपिलघुदृष्टःबिंदोरपिलघुयथास्यात्तथोपलब्धइत्यर्थः अनेनैवलिंगेनचतवदि
व्यंवपुःबलिच्छलनार्थंदिव्याकाशेआविर्भावितंत्रैविक्रमंरूपंधृतमहिमोन्नेयम् शेषंपूर्ववत् १७
अथलंकात्रिपुरदाहोदर्शयन्हरिहरौस्तौति हेईशत्रिपुरतृणंदिधक्षोस्तवकोयमाडंबरविधिःन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याणांपुराणांसमाहारस्त्रिपुरंतदेवतृणंअनायासनाश्यत्वात् तद्दधुमिच्छोस्तवकोयंमहत्प्रयोजनमु
द्दिश्यैवसंभ्रमरचना नहिलौकिकाअपिनरवच्छेद्येकुठारंपरिगृह्णंत्यतस्तवात्यल्पेप्रयोजनेनमहान्प्र-
यासउचितइत्यर्थः आडंबरविधिमेवदर्शयति रथइत्यादि क्षोणीपृथ्वीरथरूपेणपरिणता शतधृ
तिर्ब्रह्मायंतासारथिःअगेंद्रःपर्वतश्रेष्ठोमेरुःधनुःकोदंडं सोमसूर्यौहेचक्रे रथचरणंचक्रंतद्युक्तपा

दिधक्षोस्तेकोयंत्रिपुरतृणमाडंबरविधिर्विधेयैःक्रीडंत्योनखलुपरतंत्राःप्रभुधियः१८

णिर्विष्णुःशरोबाणः चतुर्थवाक्येश्रुतोप्यथोशब्दः सर्वत्रवाक्यभेदाययोजनीयः इतिशब्दःप्रकारार्थः
त्रिभुवनमपीच्छामात्रेणसंहरतस्तवैवंप्रकारेणसामग्रीसंपादनमाडंबरमात्रमित्यर्थः एवंमाक्षिप्य
परिहारमाह विधेयैरित्यादि खलुनिश्चितंप्रभोरीश्वरस्यबुद्धयः संकल्पविशेषाःपरतंत्राःपराधी
नानभवंतिअपितुस्वतंत्राएवताः कीदृश्यः विधेयैःस्वाधीनैःपदार्थैःक्रीडंत्यःखेलंत्यः नहिक्रीडा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यांप्रयोजनाद्यपेक्षास्ति तस्माद्विचित्राणिवस्तूनिस्वाधीनतयाक्रीडासाधनीकृत्यक्रीडतस्तवसर्वाणि कार्याणिस्वेच्छामात्रेणकर्त्तुंक्षमस्यलौकिकवैदिकनियमाधीनबुद्धेर्नकिंचिदप्यनुचितमित्यर्थः हरिप क्षेतु त्रीणित्रिकूटगिरिशिखराणिपुराण्याश्रयोयस्येतित्रिपुरंलंकापुरंतदेवतृणंतद्दग्धुमिच्छोस्तव कोयंश्रीरामरूपेणसुग्रीवसख्यसमुद्रबंधनादिराडंबरविधिः रथःक्षोणीत्यादिरूपकं क्षोणीवरथः

हरिस्तेसाहस्रंकमलबलिमाधायपदयोर्यदेकोनेतस्मिन्निजमुदहरन्नेत्रकमलम्

शतधृतिरिवयंता अगेंद्रइवधनुः चंद्रार्काविवरथचक्रे रथचरणपाणिरिव शरःस्वतुल्यवीर्योबाण इत्यर्थः क्षोण्यादिसदृशरथाद्युपादानमेतादृशात्यल्पप्रयोजनायापेक्षितुमुचितंनभवतीत्यर्थः शेषं पूर्ववत् १८ अथेंद्रोपेंद्रयोर्भक्तिंतत्फलंचदर्शन्हरिहरौस्तौति हेत्रिपुरहर हरिर्विष्णुः तवपादयोः साहस्रंसहस्रसंख्याकपरिमाणंकमलानांबलिमुपहारंसहस्रकमलात्मकबलिमित्यर्थः आ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धायसमर्थ्यतस्मिन्कमलसहस्रबलावेकोनेसतिएकेनकमलेनभक्तिपरीक्षार्थत्वयागोपितेनहीनेस-
ति नियमभंगोमाभूदितितत्पूरणार्थंतदाकमलांतरमलभमानोनिजमात्मीयंनेत्रकमलमेवोदहरत्
उत्पाटितवान् यदेवंस्वनेत्रोत्पाटनरूपंभजनमसोभक्त्युद्रेकःभक्तेःसेवायाअत्यंतप्रकर्षः चक्रवपुषा
स्कदर्शनरूपेणपरिणतिंगतः त्रयाणांजगतांरक्षायैजागर्त्तिपरिपालनार्थंसावधानएववर्त्ततेइत्यर्थः

गतोभक्त्युद्रेकःपरिणतिमसौचक्रवपुषात्रयाणांरक्षायैत्रिपुरहरजागर्त्तिजगताम् १९

एवमाख्यायिकाचपुराणप्रसिद्धा तथाचैवमचिंत्यमाहात्म्यस्त्वमसीतिभावः हरिपक्षेतु त्रिपुरहरेति
प्राग्व्याख्यातंहरिरिंद्रस्तवपादयोःसाहस्रंकमलबलिमाधाय कीदृशं नेत्रकमलंनेत्राण्येवकमलानि
यस्मिन्सतथा नेत्रसहस्रात्मककमलसहस्रबलिमित्यर्थः युगपन्नेत्रसहस्रव्यापारेणत्वच्चरणयोर्द- ३२
र्शनरूपमाधानंकृत्वाइत्यर्थः आधानप्रयोजनमाह निजमात्मानमेकःसहायांतरशून्यः अनेत

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जाग्रदसि प्रबुद्ध एव वर्त्तसे वर्तमाने विहितेन शत्रा जागरणस्य सर्वदास्तित्वमुच्यते तेन सर्वदे वावहितो सीत्यर्थः ननु लिङादिपदवाच्यक्रियायाः स्वर्गादिसाधनत्वान्यथानुपपत्त्या कल्प्यमपूर्वमेव फलयोगाय जागर्त्ति किमीश्वरेणेत्यत आह क्केत्यादि ध्वस्तं विनष्टं कर्म पुरुषस्य चेतनस्य फलदातुराराधनं विना क्क फलति न क्कापीत्यर्थः न हि लोके कुत्रापि विनष्टस्य कर्मणोऽपूर्वद्वारा फलजनकत्वं दृष्टम् लोकानुसारिणी च वे

अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः २०

देपि कल्पना लोकवेदाधिकरणन्यायात् चेतनस्य तु राजादेराराधितस्य विनैवापूर्वं सेवादि फलजनकत्वं दृश्यते तत्र लोकदृष्टप्रकारेणैव वैदिककर्मणामपि फलजनकत्वं संभवेन लोकविरुद्धापूर्वफलदातृत्वकल्पनावकाशः अपूर्वं हि लोकसिद्धकारणांतरनिरपेक्षं वा स्वर्गादि फलं जनयेत्तत्सापेक्षं वा आद्ये तत्फलोपभोगयोग्यदेहेंद्रियादिकमपि नापेक्षेत न चैतदिष्टं सर्वस्यापि सुखदुःखादेः शरीरसंयुक्ता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्त्वमनोयोगादिदृष्टकारणजन्यत्वाभ्युपगमात् द्वितीयेतुलोकसिद्धदेहेंद्रियाद्यपेक्षावदीश्वरापेक्षापि
नियतालोकेतथादर्शनात् तस्माच्छ्रुतिन्यायसिद्धेश्वरपदार्थधर्मिबाधकल्पनाद्वरमपूर्वपदार्थनैरपे
क्ष्यधर्ममात्रबाधकल्पनम् फलमतउपपत्तेरितिन्यायात् इदंचापूर्वमभ्युपेत्यतत्सापेक्षत्वमीश्वरस्यो
क्तम् वस्तुतस्तुनापूर्वेकिंचित्प्रमाणमस्ति लिङादीनामिष्टाभ्युपायतावाचकत्वात् तदन्यथानुपपत्ते
श्चश्रुतिन्यायसहस्रसिद्धपरमेश्वरेणैवोपक्षयात्नापूर्वसिद्धिः अपूर्वेतत्फलदातृत्त्वंचद्वयंभवद्भिःक
ल्प्यम् अस्माभिस्तुकेवलमीश्वरःकल्प्यःतस्यफलदातृत्वादिकंतुचेतनत्वाद्राजादिवल्लोकसिद्धमेव
सर्वज्ञत्वेनचतत्तत्कर्मानुरूपफलदातृत्वान्नवैषम्यनैर्घृण्यादिदोषप्रसंगः यतएवंत्वमेवसर्वकर्मफल
दाताऽतस्त्वांक्रतुषुश्रौतस्मार्त्तकर्मस्तकालांतरफलसाधनेषुफलदानप्रतिभुवंफलदानायलग्नकमि
वसंप्रेक्ष्यसम्यक्श्रुतिस्मृतिन्यायैःप्रकर्षेणनिश्चित्यकर्मफलदातुस्त्तवसद्भावप्रतिपादिकायांहिश्रुतौए
तस्याक्षरस्यप्रशासनेगार्गिद्यावापृथिव्यौविधृतेतिष्ठतःएतस्यवाअक्षरप्रशासनेगार्गिददतोमनुष्याःप्र

शंसंतियजमानंदेवादर्वीपितरोन्वायत्ताः कर्माध्यक्षःसर्वभूताधिवासः एषउत्येवसाधुकर्मकारयतितंयमुन्नि
नीषते एषउएववासाध्वित्यादिकायांश्रुतौश्रद्धांबध्वा अर्थवादत्वप्रयुक्तस्वार्थाप्रामाण्यशंकानिरासेनलो
कसिद्धदृढतरन्यायानुगृहीततयादेवताधिकरणन्यायेनस्वार्थेप्रामाण्यंनिश्चित्यजनःश्रुतिस्मृतिविहि
तकर्माधिकारीकर्मसुश्रौतस्मार्त्तेषुकृतपरिकरःकृतःपरिकरउद्यमोयेनसतथाकृतारंभोभवतीत्यर्थः
प्रतिभूसादृश्यंचएतावन्मात्रेणैवविवक्षितम् यथाकश्चिदुत्तमर्णःप्रमाणनिश्चितंदीर्घकालावस्थानंस्व
धनार्पणसमर्थंकंचित्प्रतिभुवंनिरूप्यअधमर्णेपलायितेमृतेवाएतस्मादेवकुशलिनःप्रतिभुवःसकाशा
त्स्वधनंप्राप्स्यामीत्यभिप्रायेणयस्मैकस्मैचिदधमर्णायऋणंप्रयच्छतितद्वदधमर्णस्थानीयेकर्मणिप्रली
नेपिपरमेश्वरादेवप्रतिभूस्थानीयादेतत्फलंप्राप्स्यामीत्यभिप्रायेणोत्तमर्णस्थानीयोयजमानोनिःशं
कमेवकर्मानुतिष्ठतिइतिभावः हरिपक्षेप्येवंसर्वंपूर्ववत् यद्वासुजनःसाधुजनःकर्मश्रुतिस्मृतिविहि
तंअकृतकृतवान् कीदृशःसुजनःपरिकरःपरिसर्वतःकंसुखंकरोतिददातीतितथासर्वेषांसुखकरोऽहिंसकइत्यर्थः
दृढपरिकरइतिक्वचित्पाठः तस्यदृढारंभइत्यर्थःअयंचनसांप्रदायिकः २०

एवंभगवत्प्रसादेनक्रतुफलप्राप्तिमुक्त्वाविहितानांशुभफलजनकत्वानुपपत्त्याधर्माख्यमपूर्वंद्वारत्वेन कल्पनीयमितिपक्षोनिराकृतः संप्रतिविहिताकरणनिषिद्धकरणयोरशुभफलस्यभगवत्प्रसादासा ध्यत्वात्तदर्थमवश्यमधर्माख्यंअपूर्वंकल्पनीयंइतिशंकायांराजाज्ञालंघनादेरिवभगवदाज्ञोल्लंघनाद खिलानर्थफलत्वंदृष्टद्वारेणैवभविष्यतीत्यभिप्रायेणभगवतोऽप्रसादेनक्रतुफलाप्राप्तिमनर्थप्राप्तिंचदर्शयन्

क्रियादक्षोदक्षःक्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यंशरणद्सदस्याःसुरगणाः

स्तोनि क्रियेति हेशरणद दक्षोदक्षनामाप्रजापतिः स्वयंक्रियासुअनुष्ठेयासुदक्षः प्रवीणः यज्ञविद्याकु शलइत्यर्थः एतेनविद्वत्त्वमधिकारिविशेषणंउक्तं तथातनुभृतांशरीरिणांअधीशःस्वामीप्रजापतित्वात् एतेनसामर्थ्यंअधिकारिविशेषणमुक्तम् एतादृशःक्रतुपतिः यजमानः तथाऋषीणांत्रिकालदर्शिनांभृ गुप्रभृतीनामार्त्विज्यं ऋत्विक्त्वं अध्वर्य्यादिरूपता तथासुरगणाः ब्रह्मादयोदेवगणाः सदस्याःसभ्याःउपद्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ष्टारः एतादृशसर्वसामग्रीसंपत्तावपित्वत्तः परमेश्वरात्प्रसन्नात्क्रतोर्यज्ञस्यभ्रेषः भ्रंशोजातः कीदृशा
त् क्रतुफलविधानव्यसनिनः क्रतोर्यज्ञस्यफलंस्वर्गादितस्यविधानंनिष्पादनंतेनव्यसनीतदेकनिष्ठस्त
स्मात् क्रतुफलदातृस्वभावोपित्वमवज्ञायक्रतुभ्रंशहेतुतांनीतइत्यर्थः एतदेवदृढयन्नाह ध्रुवमिति ध्रु
वंनिश्चितंक्रतुफलदातरिपरमेश्वरेविषयेश्रद्धाविधुरंभक्तिरहितंयथास्यात्तथाअनुष्ठितामखायज्ञाः कर्त्तुर्य

क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनोध्रुवंकर्त्तुःश्रद्धाविधुरमभिचारायहिमखाः २१

जमानस्याभिचारायनाशायैवभवंतीत्यर्थः हरिपक्षेतु तनुभृतामधीशःक्रतुपतिः तनुंस्वशरीरमेवबिभ्र
तिपुष्णंतिइतितनुभृतोदैत्याःदेवबाह्यास्तेहिसुरनरपितृभ्योनप्रयच्छंतिसर्वंहिंसयास्वशरीरमेवपुष्णं
तितेषामधीशोराजाबलिः क्रतुपतिर्यजमानः अथवातनूंक्षीणान्बिभ्रतिपुष्णंतितेतनुभृतोवदान्यास्ते
षामधीशोदानवाग्रण्योबलिः कीदृशः क्रियादक्षोदक्षः उत्कृष्टान्यक्षाणींद्रियाणियस्यसउदक्षःक्रिया ३५

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षश्चासावुदक्षश्चेतिसतथा सुरेषुदेवेषुगण्यंतेइतिसुरगणाः देवतुल्याः पुरुषाःसदस्याःश्रद्धाविधुरत्वंच भगवदनुगृहीतेंद्रादिगणैःसहविरोधात्स्वभक्तद्रोहोहिभगवतःस्वद्रोहादप्यधिकः शेषंपूर्ववत् २१ अथब्रह्ममारीचयोर्मृगरूपयोर्वधदर्शयन्हरिहरौस्तौति हेनाथनियामक तवपरमेश्वरस्यधनुःपाणेःधृतपिनाकस्यमृगव्याधरभसः मृगान्विध्यतीतिमृगव्याधोलुब्धकःतस्येवरभसउत्साहातिरेकोमृगव्याधरभसःशर

प्रजानाथंनाथ प्रसभमभिकंस्वांदुहितरंगतंरोहिद्भूतांरिरमयिषुमृष्यस्यवपुषा

एवतथाआरोपितःसन्नार्द्रानक्षत्ररूपेणपरिणतइतिपुराणप्रसिद्धः अमुंप्रजानाथंब्रह्माणंदिवंस्वर्गंयातंप्राप्तंनक्षत्रमध्येमृगशिरोरूपेणपरिणतमपितथासपत्रीकृतंसहपत्रेणशरंशरीरेप्रवेश्यातिव्यथांनीतःसपत्रीकृतस्ताहृशमिवात्मानंमन्यमानंरूपकमेतत् शरस्यार्द्रानक्षत्ररूपेणसन्निधानमात्रंनतुताडनमितिद्रष्टव्यम् अथवाशरेणताडितएवब्रह्मारुद्रस्यक्रोधोत्साहविशेषएवार्द्रानक्षत्ररूपेणपरिणतइतिपुराणां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

तरप्रसिद्धाद्द्रष्टव्यम् अतएवब्रसंतंनबिभ्यंतंअद्यापिनत्यजति इदानीमपिधनुष्पाणिमेवत्वांसर्वदादर्शयतीत्य
र्थः तस्यैतादृशदंडार्हतामाह स्वात्मीयांदुहितरंपुत्रींरोहिद्भूतांलज्जयामृगीभूतांऋष्यस्यमृगस्यवपुषाशरी
रेणरिरमयिषुंरमयितुमिच्छुं इयंचेल्लज्जयामृगीभूतातर्ह्यहमपिमृगरूपेणेनांभजिष्यामीतिबुध्यामृगशरी
रेणप्रसभंहठेनानिच्छंतीमपितांगतंरत्यर्थंप्राप्तं तस्यपरमवशिनोपिस्वमर्यादातिक्रमेकारणंवदन्विशिन

धनुःपाणेर्यातंदिवमपिसपत्नीकृतममुंत्रसंतंतेद्यापित्यजतिनमृगव्याधरभसः२२

ष्टि अभिकंकामुकंकामेनाभिभूतत्वात्स्वमर्यादोल्लंघिनमित्यर्थः एवंहिपुराणेषुप्रसिद्धम् ब्रह्मास्वदुहितरं
संध्यामतिरूपिणीमालोक्यकामवशोभूत्त्वातामुपगंतुमुद्यतःसाचायंपिताभूत्वामामुपगच्छतीतिलज्ज
यामृगरूपाबभूव ततस्तांतथादृष्ट्वाब्रह्मापिमृगरूपंदधारतच्चदृष्ट्वात्रिजगन्नियंताश्रीमहादेवेनायंप्र ३८
जानाथोधर्मप्रवर्त्तकोभूत्त्वाप्येतादृशंजुगुप्सितमाचरतीतिमहत्यपराधेदंडनीयोमयेतिपिनाकमाकृष्य

For Private and Personal Use Only

शरःप्रक्षिप्तः ततःसब्रह्माव्रीडितः श्वसन्मृगशिरोनक्षत्ररूपोबभूव ततःश्रीरुद्रस्यशरोपिआर्द्रानक्षत्ररूपो
भूत्वातस्यपश्चाद्भागेस्थितः तथाचार्द्रामृगशिरसोःसर्वदासन्निहितत्वादद्यापिनत्यजतीत्युक्तम् हरिण
क्षेतु हेनाथरोहिद्भूतांगतंप्रजानाथंदिवंयातमपिधनुष्पाणेस्तवमृगव्याधरभसोद्यापिनत्यजति रो
हितोरोहिण्याःसकाशाद्भवतीतिरोहिद्भूर्हरिणशावकः तस्यभावोरोहिद्भूतातांगतंहरिणशावकंप्राप्तमि
त्यर्थः प्रजाःप्राणिनोनाथयतिउपतापयतीतिप्रजानाथोराक्षसःसचप्रकृतेमारीचाख्यस्तं किमर्थंतस्य
मृगरूपधारणमित्यतआह प्रसभमभिकंरिरमयिषुं प्रकृष्टाशौर्यादियुक्तासभायस्यसप्रसभस्ततोद
शम् अभितःकानिशिरांसियस्यसोऽभिकोदशग्रीवस्तम् सीतापहरणोपायेनक्रीडयितुमिच्छुम् तथा
स्वांदुहितरंअयोनिजांकन्यांसीतांकृष्यस्यवपुषाविचित्रमृगशरीरेणारिरमयिषुंप्रसादयितुमिच्छुम्
विचित्रमृगरूपंमांदृष्ट्वासीतास्त्रीस्वभावादतिमुग्धामच्चर्मग्रहणार्थंश्रीरामंप्रेरयिष्यतिततोरामेबहु
दूरंमयाऽपसारितेलक्ष्मणेच तदुद्देशार्थंगतेएकाकिनींसीतांरावणःसुखेनहरिष्यतीत्यभिप्रायेणधृत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विचित्रमृगशरीरमित्यर्थः अतएवबाणेनसपत्नीकृतत्वाद्दिवंपरलोकंयातमृतमित्यर्थः अमुंमृतमपित्रसं
तमद्यापितवमृगव्याधरभसोनत्यजतीत्युत्प्रेक्षारूपोध्वनिः शेषंपूर्ववत् २२ परमवशिनांवरावपिश्री
राममहादेवौलक्ष्मीपार्वत्यनुकंपयास्त्रैणमिवाऽस्मानंदर्शयतइतिप्रतिपादयन्स्तौति हेपुरमथनहेयम
निरतयमनियमासनाद्यष्टांगयोगपरायण एतेनजितेंद्रियत्वमुक्तम् पुष्पायुधंकामंत्वयातृणवदङ्गा

स्वलावण्याशंसाधृतधनुषमन्हायतृणवत्पुरःप्लुष्टंदृष्ट्वापुरमथनपुष्पायुधमपि

यत्तृणमिवशीघ्रंपुरःसाक्षादेवअव्यवधानेनदृष्ट्वाचाक्षुषज्ञानेनविषयीकृत्यप्लुष्टंदग्धम् कीदृशंपुष्पा
युधं स्वलावण्याशंसाधृतधनुषं स्वस्याःपार्वत्याः यल्लावण्यंसौंदर्याऽतिशयस्तद्विषया शंसा परमयो
गिनमपिश्रीरुद्रमस्याःसौंदर्यातिशयेनवशीकरिष्यामीतियाप्रत्याशातयानिमित्तभूतयाधृतंधनुर्येने
तितथातम् एतेनस्वलावण्यातिशयस्यापिरुद्रविषयेअकिंचित्करत्वमुक्तम् तथाचैवंस्वलावण्यवैय



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्थ्यंपुष्पायुधंचतृणवद्दाहंचस्वयंसाक्षात्प्रत्यक्षापिदेवीपार्वतीइयंचिरकालंमामुद्दिश्यतपःकृतवती
विरहदुःखंमाप्राप्नोत्विति करुणामात्रेणदेहार्धघटनात् त्वयाशरीरार्द्धेवस्थापनाद्धेतोर्भ्रमबीजात् यदि
त्वांसर्वैर्योगिनांवरंस्त्रैणंयदयंमदधीनोनभवेत्कथंमांस्वशरीरार्द्धेस्थापयेदितिभ्रांत्यास्त्रीसक्तमवैतिवि
शेषादर्शनात्कल्पयतितर्हितदद्धायुक्तमेवतस्याः अयुक्तस्यापियुक्तत्वेहेतुमाह बतेत्यादि हेवरद अति

यदिस्त्रैणंदेवीयमनिरतदेहार्धघटनादवैतित्वामद्धाबतवरदमुग्धायुवतयः२३

दुर्लभंअपिस्वदेहार्द्धंदत्तमितिवरदेतियोग्यंसंबोधनम् बताहोयुवतयस्तरुण्यःमुग्धाअतत्त्वज्ञाःस्वभा
वतएवेतिशेषः तथाचसहजानांयुवतिविभूषणानांप्रधानंमौग्ध्यंअनुकुर्वत्याःस्वरूपतश्चितिरूपाया
अपिदेव्यामिथ्याज्ञानंयुक्तमित्यर्थः हरिपक्षेतु हेअर्द्धघटनादव घटनायाअर्द्धमित्यर्द्धघटनाअर्द्धपि
पत्नीवत् तस्यादवोवह्निःदाहकइतियावत् सीतारूपायालक्ष्म्यारामरूपेणोचितात्संयोगात्स्वेच्छया

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽर्द्धसंभोगंदत्वाजाऽर्द्धंविप्रलंभंदत्तवानसीत्यर्थः सापूर्वश्लोकोक्तादेवीसीतारूपालक्ष्मीः कीदृशीयमनिर
तदेहाअत्यंतंपतिव्रता नथापुरमथनपुष्पा पुरस्यशरीरस्यमथनानिपीडकानिपुष्पाणियस्याःसातथापु
ष्पाणामपिस्पर्शात्त्पीडोत्पत्तेरतिसुकुमारांगीत्यर्थः त्वांश्रीरामरूपंयदिस्नेहेणमेत्यावगच्छतितद्द्वेत्या
दिपूर्ववत् त्वांकीदृशंस्वलावण्याशं स्वकीयंलावण्यमत्रशौर्यादिगुणकृतंसौंदर्यंतस्मिन्नाशायस्य
सस्वलावण्याशस्तं सीतायाअनुद्धरणात्स्वस्यशौर्यादिप्रसिद्धिर्गच्छेदितिस्वकीर्त्तिरक्षार्थिनमित्य-
र्थः अतएवधृतधनुषंसज्जीकृतकोदंडं इदमेकंभ्रमबीजमुक्तंभ्रमबीजांतरमाह अन्हायतृण
वत्पुरःपुष्टंदृष्ट्वा शीघ्रमेवतृणस्येवपुरोलंकायाःपुष्टंदाहंभावेक्तः तथायुधंयुद्धमपिदृष्ट्वा त
थाचस्वकीर्त्तिरक्षार्थमत्यंतपतिव्रतायाश्चदेव्याःकारुण्येनक्लेशविमोचनार्थंसज्जीकृतकोदंडं
त्वामर्द्धघटनादवसपि अयंयदिमदधीनोनभवेत्तदाकथमेतादृशदुष्करकर्माणिमामुद्दि ३८
श्यकुर्यादितिभ्रमेणस्त्रीमक्तमिवकल्पयतीत्यर्थः शेषंपूर्ववत् २३ ⁂ ⁂

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथस्वयममंगलशीलतयाक्रीडन्नपिभक्तानां मंगलमेवददासि स्वयममंगलशीलानामपिभक्तानां त्वमेवमंगलमसीतिचवदन्शंकरनारायणोस्तौति हेस्मरहर हेवरद तवअखिलमपिशीलंसर्वमपि चरितंएवंप्रकारेणामंगल्यंमंगल्यविपरीतंभवतुनामकिंनस्तेननिरूपितेनेत्यर्थः तथाचस्वयममं- गल्यशीलोपिस्मर्तॄणांतवस्मरणकर्त्तॄणांत्वंपरमंमंगलमेवासिनिरतिशयंकल्याणमेवभवसि

स्मशानेष्वाक्रीडास्मरहरपिशाचाःसहचराश्चिताभस्मालेपःस्रगपिनृकरोटीपरिकरः

तेनअमंगलशीलोयंरुद्रोनमंगलकामैःसेवनीयइतिभ्रमंपरिहृत्यमनोवाक्कायप्रणिधानैःसर्वदासवैःसेवनीयोसीत्यर्थः एवंपदसूचितममंगल्यंशीलमेवदर्शयति स्मशानेष्वादित्यादि स्मशानेषुशवशयनेषुआसमंतात्केलिःपिशिताशनाःप्रेताःसहायाःचिताशवदाहस्थंभस्मांगरागसाधनं नृकरोटीमनुष्यशिरोस्थिसमूहोमाला अपिशब्दादन्यदप्यार्द्रचर्मादि हरिपक्षेतु हेवरदतवस्मर्तॄणाममंगल्यं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शीलंभवतुनामतथापितेषांत्वमेवपरमंमंगलमसीत्यर्थः तथाचगीतासु अपिचेत्सुदुराचारोभजते मामनन्यभाक् साधुरेवसमंतव्यःसम्यग्व्यवसितोहिसइति अथवातवनामस्मर्त्तॄणामितियोज्यं नाममात्रंस्मरतांपरमंमंगलमसित्वांस्मरतांतुकिंमुवाच्यमित्यर्थः कीदृशंनामअखिलंनखिलंफलर

अमंगल्यंशीलंतवभवतुनामैवमखिलंतथापिस्मर्त्तॄणांवरदपरमंमंगलमसि २४

हितंअखिलंसर्वदासर्वत्रसफलमित्यर्थः अत्यंतपापित्वेनप्रसिद्धानामजामिलादानामपित्वंनाममात्रस्यपुत्रनामत्वेनमरणव्यथयाशिथिलकरणत्वेनचमंदमुच्चारणेपिसर्वपापक्षयद्वारापरमपुरुषार्थप्राप्तिश्रवणात् अमंगल्यंशीलमेवदर्शयति स्मशानेष्वित्यादिरूपकेणअत्यंततिरस्कृतवाच्योध्वनिरयंलक्षणामूलः शवशयनतुल्येषुसर्वदारोदनप्रधानेषुगृहेषाईषत्क्रीडाअल्पकालवैषयि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृतुच्छसुखप्राप्तिरित्यर्थः तथाच स्मरहरपिशाचाःसहचराः स्मरणंस्मरः शास्त्रीयोविवेकस्तं ह
रंतीतिस्मरहराः पिशाचतुल्याः पुत्रभार्यादयःपिशाचाः स्मरहराश्चतेपिशाचाश्चस्मरहरपिशाचाः
यथापिशाचाःस्वावेशेनज्ञानलोपंकृत्वापुरुषमनर्थेयोजयंति तथापुत्रभार्यादयोपि तादृशाश्च
वस्तुगत्यावैरिणोपिसहैवचरंतिनक्षणमपित्यजंतीतिसहचराः तथाचिताभस्मतुल्यआले
पः देहस्यविण्मूत्रपूयादिपूर्णत्त्वेनातिजुगुप्सितत्त्वात्तदालेपस्याप्यतिजुगुप्सितत्वम् तथाम
नुष्यशिरोस्थिसमूहतुल्यामाला पिशाचतुल्यंभार्यादिविनोदहेतुत्वात् अपिशब्दादन्यदपि
सर्वंचरितंविषयसंगिनाममंगलमेव एतादृशाअपिचेत्त्वांत्वन्नामवास्मरंति तदात्वमेवतेषां
मंगलरूपेणाविर्भवसीत्यहोतिभक्तवात्सल्यमित्यर्थः हरपक्षेप्येवंयोजनीयम् २४ अती
तःपंथानमित्यत्रहिपदार्थत्रयमुपन्यस्तंकतिविधगुणइत्यनेनसगुणमैश्वर्यं कस्यविषयइत्य
नेनाद्वितीयंब्रह्मस्वरूपं पदेत्त्वर्वाचीनइत्यनेनलीलाविग्रहविहारादि तत्राजन्मानोलोकाइत्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्रसामान्यतः परमेश्वरसद्भावं दृढीकृत्य तवैश्वर्यं यत्नाद्यदुपरीत्यादिना सगुणमैश्वर्यं लीलाविग्र
हविहारादिकं च वर्णितम् संप्रत्यद्वितीयं ब्रह्मस्वरूपं वक्तव्यमवशिष्यते तदनभिधाने पूर्वोक्तस्य
सर्वस्यापि तुषकंडनवत्त्वप्रसंगात् निर्गुणब्रह्मस्वरूपस्यैव सर्वश्रुतिस्मृतितात्पर्यविषयत्वेन सत्य
त्वात् सर्वस्यापि प्रपंचस्य स्वप्नवन्मिथ्यात्वात् तस्मान्निर्गुणब्रह्मनिरूपणाय उत्तरग्रंथारंभः तत्र
पूर्वश्लोके त्वं परमं मंगलमसीत्युक्तं तत्रैवमाशंकनीयं मंगलं हि सुखं न चेश्वरस्य सुखस्वरूपत्वं
संभवति सुखस्य जन्यत्वाद्गुणत्वाच्च ईश्वरस्य नित्यत्वाद्द्रव्यत्वाच्च नित्यज्ञानेच्छाप्रयत्नवानीश्वरो
न सुखरूपो नापि सुखाश्रय इति तार्किकाः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः
श्चितिरूपो न सुखरूप इति पातंजलाः तदेवं नाद्वितीय ईश्वरो नापि सुखस्वरूप इत्याशंक्य तस्या
द्वितीयपरमानंदरूपत्वे विद्वदनुभवरूपं प्रत्यक्षं प्रमाणं वदन्स्तौति हे वरद यत्किमपि तत्त्वं इ
दं तया वक्तुमशक्यं सत्यज्ञानानंतानंदात्मकं वस्त्वालोक्य वेदांतवाक्यजन्यया ऽखंडाकारवृत्त्या ऽ ५०

परोक्षीकृत्ययमिनः शमादिसाधनसंपन्नाः परमहंसाः अंतराल्हादं बाह्यकरणविलक्षणंनिरति
शयसुखंदधति पूर्वविद्यमानमेवधारयंतिनतुउत्पादयंतिनित्यत्वात् तत्तत्त्वंकिलभवानिति
किलेतिप्रसिद्धौ सत्यज्ञानानंतानंदात्मकत्वेनैवश्रुतिषुप्रसिद्धोभवान्नतार्किकाद्युक्तप्रकारः
अतस्त्वंकथंपरमंमंगलंनभवसीति वाक्यशेषः तत्राल्हादस्यनिरतिशयत्वंदर्शयितुंदृष्टांतमा

मनःप्रत्यक्चित्तेसविधमवधायात्तमरुतःप्रहृष्यद्रोमाणःप्रमदसलिलोत्संगितदृशः

ह अमृतमयेन्हदेनिमज्ज्येव यस्यखलुलेशमात्रमपिस्पृष्ट्वासकलसंतापोपशमेनसुखिनोभवं
तिकिमुतवक्तव्यंतस्यनिमज्जनरूपसर्वांगसंयोगेनेतिकारणातिशयात्कार्यस्याप्यतिशयःसू
चितः यद्यपिब्रह्मानंदस्यसर्वातिशयिनोनकोपिदृष्टांतोस्तितथापीषत्साम्येनापिलोकानांबु
द्धिदार्ढ्यायेदमुक्तं एतादृशब्रह्मानंदानुभवस्यासाधारणंकारणमाह मनइत्यादिना चित्तेत्व

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयांबुजे मनः संकल्पविकल्पात्मकं अवधाय निरुद्धवृत्तिशून्यं कृत्वेत्यर्थः कीदृशं मनः प्रत्यक् चक्षु
रादींद्रियद्वाराबहिर्विषयप्रवृत्तिप्रतिकूलतया अंतर्मुखतयैवांचतीति प्रत्यक् कीदृशा यमिनः सवि
धं सप्रकारं यथा स्यात्तथा आत्तमरुतः शास्त्रोपदिष्टमार्गेणैव कृतप्राणायामा इत्यर्थः अत्र सविधमि
त्यनेन यमनियमादिसाधनानि सूच्यंते आत्तमरुत इत्यनेन चतुर्थः कुंभकः विषयेभ्य इंद्रियाणां

यदालोक्याल्हादं ह्रद इव निमज्यामृतमये दधत्यंतस्तत्त्वं किमपि यमिनस्तत्किल भवान् २५

निवर्त्तनरूपः प्रत्याहारः प्रत्यक्पदेन सूचितः चित्त इत्यनेन हृदयांबुजाख्यदेशसंबंधात्समूहावलं
बनाख्या धारणोक्ता अवधायेत्यनेन ध्यानसमाधी तदुक्तं भगवता पतंजलिना देशसंबंधश्चित्त
स्य धारणा तत्र प्रत्ययैकतानता ध्यानं तदेवार्थमात्रनिर्भासस्वरूपशून्यमिव समाधिरिति चित्तस्य
वशीकरणार्थं मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञाख्यचक्राणामन्यतमदेशेवस्था



For Private and Personal Use Only

पनंधारणेत्युच्यते प्रत्ययस्यएकतानतैकविषयःप्रवाहः सचद्विविधः विच्छिद्यविच्छिद्यजायमानःसंततश्चेति
तावुभौक्रमेणध्यानसमाधीभवतः एतेनाष्टांगयोगपरिपाकोब्रह्मसाक्षात्कारहेतुर्निदिध्यासनरूपत्वेनोक्तःए
वंब्रह्मानंदानुभवस्यकारणमुक्त्वाकार्यमाह प्रहृष्यद्रोमाणःप्रकर्षेणपुलकितांगाः तथाप्रमदसलिलोत्संगितदृ
शःहर्षाश्रुपूर्णनेत्राः एतदुभयंचयमिनामानंदानुभवानुमानेलिंगमुक्तं अत्रप्रशब्देनोत्संगितशब्देनचलौकिक
सुखापेक्षयाऽतिशयविशेषोव्यज्यते यस्यचतत्त्वस्यालोचनमात्रेणापिअन्येपरमाह्लादंबिभ्रति तत्स्वयंपरमा-
ह्लादरूपंभवतीतिकिमुवक्तव्यंइत्युक्तं विज्ञानमानंदंब्रह्मआनंदोब्रह्मेतिव्यजानात्एषएवपरमआनंदोयोवैभू
मातत्सुखं कोह्येवान्यात्कःप्राण्याद्यदेषआकाशआनंदोनस्यादित्याद्याःश्रुतयश्चास्मिन्नर्थेप्रमाणत्वेनद्रष्टव्याः
हरिपक्षेप्येवम् २५ एवमद्वितीयेब्रह्मणिपरमानंदरूपेसर्वात्मकेविद्वदनुभवरूपंप्रत्यक्षंप्रमाणमुक्तंअधुना
तस्यैवाद्वितीयत्वंतर्केणापिसाधयन्स्तौति हेवरदपरिणताःपरिपक्वबुद्धयस्त्वयिविषयेएवंपरिच्छिन्नांएवंप्रकारे
णपरिच्छिन्नत्वेनत्वांप्रतिपादयंतींगिरंवाचंबिभ्रतधारयंतनाम केनरूपेणपरिच्छिन्नामित्यतआह त्वमर्कइत्या

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दिना अत्रसर्वत्रत्वंशब्दोवाक्यालंकारार्थः उशब्दोऽवधारणेत्वमित्यनेनसंबध्यते चशब्दःसमुच्चये इतिशब्दःस
माप्तौ अर्कादयःप्रसिद्धाः आत्माक्षेत्रज्ञोयजमानरूपः एतेचाष्टौश्रीरुद्रमूर्त्तित्वेनागमप्रसिद्धावक्ष्यमाणभवादि
नामाष्टकसहिताश्चतुर्थ्यंतानमोंताअष्टौमंत्राभवंति तेगुरूपदेशेनज्ञातव्याः एतदष्टमूर्त्तित्वंचान्यत्राप्युक्तं क्षि
तिहुतवहक्षेत्रज्ञांभःप्रभंजनचंद्रमस्तपनवियदित्यष्टौमूर्त्तिर्नमोभगवतेबिभ्रतेइति तेनसर्वात्मकमपित्वामर्का

त्वमर्कस्त्वंसोमस्त्वमसिपवनस्त्वंहुतवहस्त्वमापस्त्वंव्योमत्वमुधरणिरात्मात्वमितिच

द्यष्टमात्रमूर्त्तित्वांवदंतीत्यर्थः अत्रापरिणताइत्यस्मिन्नर्थेपरिणताइतिसोपहासं बिभ्रत्तीतिलोद्धानतुमतावन्
प्यनुमतिप्रकाशनात् तेनसर्वथानुचितमेवैतदित्यर्थः तर्हिकिमुचितंज्ञात्वात्वयेदमनुचितमुच्यतइत्यतआह
नेत्यादिना हियस्मात् इहजगतितत्तत्त्वंवस्तुवयंनजानीमोयद्वस्तुत्वंनभवसित्वद्भिन्नमितियावत् अत्रत्वस्य
प्रमाणकौशलेनोत्कर्षंख्यापयितुंविभ्रइतिबहुवचनं वयंतुत्वदभिन्नत्वेनैवयुक्तासर्वंजानीमइत्यर्थः एवंच ४२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नवसर्वात्मकत्वादर्कादिविशेषरूपाभिधानंव्यर्थमेवतथाचश्रुतिः इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णो
गरुत्मान् एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः एषउह्येवसर्वेदेवाइतिचसर्वदेवभेदंवारयति नहि
सदतिरिक्तंकिंचिदुपलभ्यतेसद्रूपश्चात्मात्मेवेतितर्केणापिसिद्धमद्वैतं नचसर्वस्यब्रह्मरूपत्वेघटादिज्ञानस्या
पिब्रह्मज्ञानरूपत्वात्ततोपिमोक्षमसंगइतिवाच्यं अन्यानुपरक्तचैतन्यभानस्यैवमोक्षहेतुत्वात् घटाद्याका

परिच्छिन्नामेवंत्वयिपरिणताबिभ्रतुगिरंनविद्मस्तत्तत्त्वंवयमिहतुयत्त्वंनभवसि २६

रज्ञानस्यचाविद्यापरिकल्पितान्योपरक्तचैतन्यविषयत्वात् अन्योपरक्तचैतन्यस्यचसद्रूपेणचक्षुरादिविष
यत्वेप्यन्यानुपरक्तस्यतस्यनवेदांतवाक्यमात्रविषयत्वव्याघातः ननुसर्वस्यसन्मात्रत्वेपिनाद्वैतसिद्धिः भिन्ना
नामपिसत्ताजातियोगेनसदाकारबुद्धिविषयत्वसंभवात् अन्यथाद्रव्यगुणकर्मादिभेदव्यवहारोनस्यादि
तिचेन्न द्रव्यंसद्गुणःसन्नित्यादिप्रतीतेर्द्रव्यत्वादिधर्मविशिष्टैकसन्मात्रविषयत्वमेवनतुद्रव्यादिधर्मिष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिन्नेषुसत्तारव्यधर्मविषयत्वंधर्मिकल्पनातोधर्मकल्पनायालघुत्वात् एकस्मिन्सतिचसर्वाभिन्नेमायिकना
नाप्रतीत्युपपत्तेः द्वौचंद्रावित्यत्रचनपारमार्थिकभेदकल्पनावकाशः तथाचायंप्रयोगः अयंद्रव्यगुणादिभेद
व्यवहारः सर्वभेदानुगतजात्यात्मकैकवस्तुमात्रावलंबनः भेदव्यवहारत्वात्द्विचंद्रभेदव्यवहारवदिति
तस्मान्नचेतनमचेतनंवाकिंचिदपिपरमात्मनोभिन्नमुपपद्यते सएषइहप्रविष्टः अनेनजीवेनात्मनानु
प्रविश्यनामरूपेव्याकरवाणीत्यादिश्रुत्याप्रवेष्टुरविकृतस्यैवजीवरूपेणप्रवेशप्रतिपादनात् तथाइदंसर्वं
यदयमात्मेत्यादिश्रुत्याब्रह्मैकोद्भवत्वब्रह्मसामान्यब्रह्मैकप्रलयत्वादिहेतुभिरूर्णनाभ्यादिदृष्टांतेनाका-
शादिप्रपंचस्यब्रह्मात्मकत्वप्रतिपादनात् सदेवसोम्येदमग्रआसीत् एकमेवाद्वितीयमितिचकंठत-
एवाद्वितीयत्वोक्तेः एवंचसदाकारप्रत्यक्षंभेदव्यवहारत्वलिंगसार्वात्म्यश्रुत्यन्यथानुपपत्तिश्चेतिप्रमा
णत्रयमुक्तं विस्तरेणचात्रयुक्तयोवेदांतकल्पलतिकायामनुसंधेयाः तस्मान्नविभ्रमइत्यादिनासाध्वेवोक्त ४३
मद्वितीयत्वम् हरिपक्षेतु अर्कादिशब्देनतत्तदवच्छिन्नादेवतात्मानउच्यंते यएवासावादित्येपुरुषएत

For Private and Personal Use Only

मेवाहं ब्रह्मोपास इत्यादिना ऽजातशत्रवे दृप्तबालाकिनोपदिष्टाः बृहदारण्यके कौषीतकी ब्राह्मणे च प्रसिद्धाः परिच्छिन्नत्वादिदोषेणाब्रह्मत्वं चैषां तत्रैवाजातशत्रुणा प्रतिपादितं सहोवाचाजातशत्रुरेतावन्नु इत्येतावद्धि दितं भवतीत्यादिना अन्यत्सर्वं समानम् २६ एवं प्रत्यक्षानुमानार्थापत्तिभिरद्वितीयत्वं परमेश्वरस्य सर्वात्मकत्वेन प्रसाध्य तदेवागमेनापि साधयन्स्तौति हे शरणद आर्त्ताभयप्रद ओमिति पदं त्वां सर्वा

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति

त्मानमद्वितीयं गृणाति अवयवशक्त्या समुदायशक्त्या च प्रतिपादयति अत एवोंकारस्यावयवशक्त्या वाक्यत्वेपि समुदायशक्त्या पंकजादेरिव पदत्वमुपपन्नं योगरूढिस्वीकारात् तदस्वीकारोपि सुप्तिङंतं पदमिति वैयाकरणपरिभाषया पदत्वं कृत्तद्धितसमासाश्चेति अनेन समासस्यापि प्रातिपादिकसंज्ञाविधानात्सुबंतत्वमुपपन्नमेव कीदृशमोमिति पदं समस्तं अकारोकारमकाराख्यपदत्रयकर्मधारयस

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मासनिष्पन्नं एतेनसमुदायशक्तिरुक्ता तथाव्यस्तांभिन्नंअकारउकारमकाराख्यस्वतंत्रपदत्रयात्मकमित्य
र्थः एतेनावयवशक्तिरुक्ता इदंचपदद्वयमभिधेयेपियोज्यं त्वांकीदृशंसमस्तंसर्वात्मकं तथाव्यस्तंआध्या
त्माधिदैवादिभेदेनभिन्नतयाप्रतीयमानं तथाचव्यस्तमोमितिपदंव्यस्तंत्वांगृणाति समस्तमोमितिपदं
समस्तंत्वांगृणातीत्युक्तंभवति एतदेवदर्शयति त्रयीमित्यादिना त्रयीवेदत्रयं तिस्रोवृत्तयोजागृत्स्वप्नसुषुप्त्या

तुरीयंते धामध्वनिभिरवरुंधानमणुभिःसमस्तंव्यस्तंत्वांशरणदगृणात्योमितिपदम् २७

ख्या अंतःकरणस्यावस्था एतच्चविश्वतैजसप्राज्ञानामप्युपलक्षणं त्रिभुवनंभूर्भुवःस्वःएतदपिविराट्हिरण्य
गर्भाव्याकृतानामुपलक्षणं त्रयःसुराःब्रह्मविष्णुमहेश्वराः एतच्चसृष्टिस्थितिप्रलयानामप्युपलक्षणं एतच्चस
र्वमकाराद्यैस्त्रिभिर्वर्णैरभिदधदभिधावृत्त्याप्रतिपादयद्व्यस्तमित्यर्थः एवमत्रमकारःऋग्वेदोजागृदवस्थाभू
र्लोकोब्रह्माचेतिचतुष्टयमकारार्थः तथायजुर्वेदःस्वप्नावस्थाभुवर्लोकोविष्णुश्चेतिचतुष्टयमुकारार्थः तथा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सामवेदःसुषुप्त्यवस्थास्वल्लोंकोमहेश्वरश्चेतिचतुष्टयंमकारार्थः मांडूक्यनृसिंहतापनीयाथर्वशिरआदावन्यदप्यु
क्तंगुरूपदेशाज्ज्ञातव्यं अतिरहस्यत्वान्नेहसविशेषमुच्यते तस्मादध्यात्माधिदैवाधिभूताधिवेदाधियज्ञादियाव
दन्यत्रोक्तमस्तितत्सर्वमत्रोपसंहर्त्तव्यंन्यूनतापरिहाराय तथाचसर्वप्रपंचाकारेणव्यस्तंत्वांअकारोकारमका
रैर्व्यस्तमोमितिपदमभिदधत्त्वांगृणातीतिसंबंधः तथातीर्णविकृतिसर्वविकारातीतंतुरीयंअवस्थात्रयाभि
मानिविलक्षणंतवधामस्वरूपंअखंडंचैतन्यात्मकं तवेतिराहोःशिरइतिवद्भेदोपचारेणषष्ठी अणुभिर्ध्वनि
भिरवरुंधानंस्वतउच्चारयितुमशक्यैरर्द्धमात्रायाःप्लुतोच्चारणवशेननिष्पाद्यमानैःसूक्ष्मशब्दैरवबोधंकुर्वत्सा
पयत्समुदायशक्त्याबोधयदितियावत् अर्द्धमात्रायाएकत्वेपिध्वनिभिरितिबहुवचनंप्लुतोच्चारणेचिर
कालमनुवृत्तायास्तस्याअनेकध्वनिरूपत्वान्नविरुद्धं ध्वनीनांचाणुत्वाणुतरत्वाणुतमत्वादिकंगुरूपदेशा
दधिगंतव्यं तथाचार्द्धमात्रारूपेणसमस्तमोमितिपदंसमुदायशक्त्यासर्वविकारातीतंतुरीयस्वरूपमभि
दधत्समस्तंत्वांगृणातीतिसंबंधः एवंचपदार्थाभिधानमुखेनाखंडवाक्यार्थसिद्धिरर्थादुक्ता तथाहि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थूलप्रपंचोपहितचैतन्यंमकारार्थः तत्रस्थूलप्रपंचांशत्यागेनकेवलचैतन्यमकारेणलक्ष्यते तथासूक्ष्मप्रपं
चोपहितचैतन्यमुकारार्थस्तत्रसूक्ष्मप्रपंचांशत्यागेनोकारोपलक्ष्यते तथास्थूलसूक्ष्मप्रपंचद्वयकारणीभू
तमायोपहितचैतन्यंमकारार्थः तादृशमायांशपरित्यागेनमकारेणचैतन्यमात्रंलक्ष्यते एवंतुरीयत्त्वसर्वानु
गतत्वोपहितंचैतन्यमर्द्धमात्रार्थस्तदुपाधिपरित्यागेनार्द्धमात्रायाचैतन्यमात्रंलक्ष्यते एवंचतुर्णांसामानाधि
करण्यादभेदबोधेपरिपूर्णमद्वितीयचैतन्यमात्रमेवसर्वद्वैतोपमर्द्देनसिद्धंभवति लक्षणयापरित्यक्तानां
चोपाधीनांमायातत्कार्यत्त्वेनमिथ्यात्वात् स्वरूपबोधेनचस्वरूपाज्ञानात्मकमायातत्कार्यानिवृत्तेर्नपृथ
गवस्थानप्रसंगः नहिअधिष्ठानसाक्षात्कारानंतरमपितदध्यस्तमुपलभ्यते त्र्यादीनांवाक्यार्थबोधानुप
योगेप्युपासनायामुपयोगात्पृथगभिधानंदृष्टव्यं तस्मात्सर्वद्वितीयशून्यंप्रत्यगभिन्नंब्रह्मप्रणववाक्या
र्थइतिसिद्धं एतच्चसर्वेषांतत्त्वमस्यादिमहावाक्यानामुपलक्षणं तेषामपिप्रत्यगभिन्नपरिपूर्णाद्वितीयब्र
ह्मप्रतिपादकत्वात् यथाचशब्दादपरोक्षनिर्विकल्पकबोधोत्पत्तिस्तथाप्रपंचितमस्माभिर्वेदांतकल्पलति
कामित्युपरम्यते हरिपक्षेप्येवं २७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवंतावद्द्वितीयब्रह्मवाचकत्वेनप्रणवउपन्यस्तः एतस्याचार्यानुसंधानंजपश्चसमाधिसाधनत्वेनपतंजलिनासूत्रितः समाधिसिद्धिरीश्वरप्रणिधानाद्धेति सूत्रांतरं तस्यवाचकः प्रणवश्चतज्जपस्तदर्थभावनमितिसूत्राभ्यांप्रणवजपस्यप्रणिधानशब्दार्थत्वेनव्याख्यानात् श्रुतौचएतदालंबनंश्रेष्ठमेतदालंबनंपरं एतदालंबनंज्ञात्वायोयदिच्छतितस्यतदित्यादिनातस्यसर्वपुमर्थहेतुत्वमुक्तं एतस्यचातिदुरूहार्थत्वेनस्त्रीशूद्राद्यनर्हत्वेनचासाधारणत्वात्सर्वसाधारणानिप्रसिद्धानिभगवद्वाचकानिपदानिजपार्थत्वेनवदन्

भवःशर्वोरुद्रःपशुपतिरथोग्रःसहमहांस्तथाभीमेशानावितियदभिधानाष्टकमिदम्

स्तौति हेशरणद हेदेवइदंयदभिधानाष्टकंनामाष्टकं अस्मिन्नभिधानाष्टकेविषयेप्रत्येकमेकैकशः प्रतिनामेतियावत् श्रुतिर्वेदःप्रविचरति प्रकर्षेणबोधकतयाचरतिवर्त्ततइत्यर्थः अपिशब्दात्स्मृतिपुराणागमादिकमपि अथवाप्रणवइवास्मिन्नपिश्रुतिःप्रविचरतीतियोज्यम् यद्यप्यष्टाध्यायार्थकांडेवन्हि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नामत्वेनैतानिसमाम्नातानितथापिवन्हेर्भगवद्विभूतित्वात्तन्नामत्वेपिनभगवन्नामत्वव्याघातः य
द्वाअमुष्मिन्नामाष्टकेदेवानांब्रह्मादीनामपिश्रुतिः श्रवणेंद्रियंप्रविचरतिसावधानतयावर्त्तते देवाअ
पित्वन्नामश्रवणोत्सुकाः किंपुनरन्यइत्यर्थः किंतन्नामाष्टकंइत्यतआहभवइत्यादि महतामहच्छब्दे
नसहवर्त्ततइतिसहमहान्महादेवः तथैवागमप्रसिद्धः इतिशब्दःसमाप्त्यर्थः यस्यचनाममात्रमपिस

अमुष्मिन्प्रत्येकंप्रविचरतिदेवश्रुतिरपिप्रियायास्मैधाम्नेप्रणिहितनमस्योस्मिभवते २८

र्वपुरुषार्थप्रदंसपुनःस्वयंकीदृशइतिभक्त्युद्रेकेणप्रणमति प्रियायेत्यादिना अस्मैस्वप्रकाशचैतन्यरू
पत्वेनसर्वदाऽपरोक्षायभगवतेमहेश्वराय कीदृशायधाम्नेसर्वेषांशरणभूतायचिद्रूपायेतिवा योग्य
मुपचारंकिमपिकर्त्तुमशक्नुवन्नहंकेवलंप्रणिहितनमस्योस्मि प्रकर्षेणवाङ्मनःकायव्यापारैरतिश
येनविहितानमस्यानमस्क्रियायेनसतथाकेवलंतुभ्यंकृतनमस्कारोभवामीत्यर्थः प्रणिहितेतिपा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ठेप्ययमेवार्थः हरिपक्षेप्येवम् भवादीनांच हरिनामत्त्वंयोगहृत्त्यासंभवत्येवसहस्त्रनामस्तुतिपठितत्त्वाच्चेतिद्रष्टव्यम् अथवायदिदमभिधानाष्टकंअमुष्मिन्प्रत्येकंदेवश्रुतिरपिदेवशब्दोपिप्रविचरति संबद्धोभवति तथाचभवदेवइत्यादिकं तवरहस्यनामाष्टकमित्यर्थः तथाचभवस्यरुद्रस्यापिदेवआराध्यइत्यर्थः एवमन्येष्वपिनामसुद्रष्टव्यम् २८ एवंजातभक्त्युद्रेकोनमस्कारमेवानुवर्त्तयन्दुरूहमहिम

नमोनेदिष्ठायप्रियदवदविष्ठायचनमोनमःक्षोदिष्ठायस्मरहरमहिष्ठायचनमः

तेनभगवंतंस्तौति हेप्रियदवअभीष्टनिर्जनवनविहार तेतुभ्यंनेदिष्ठायअत्यंतनिकटवर्त्तिनेदविष्ठायात्यंतदूरवर्त्तिनेचनमोनमः हेस्मरहरकामांतक क्षोदिष्ठायक्षुद्रतरायमहिष्ठायमहत्तरायचतुभ्यंनमोनमः तथाहेत्रिनयनत्रिनेत्रवर्षिष्ठायअतिवृद्धायवृद्धतरायेतिवायविष्ठाययुवतमायचतुभ्यंनमोनमः एवमत्यंतविरुद्धस्वभावस्याल्पबुद्धिभिःस्वरूपनिर्णयासंभवात् सर्वदानमस्कार

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवकरणीयइतिप्रदर्शनायनमस्कारशब्दावृत्तिः तथाचश्रुतिः दूरात्सुदूरेतदिहांतिकेच अणोरणीया
न्महतोमहीयान् त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवाकुमारी त्वंजीर्णोदंडेनवंचसित्वंजातोभवसिवि
श्वतोमुखइत्यादि तथाकिंबहुनासर्वस्मैसर्वरूपायतुभ्यंनमः इदंसर्वंयदयमात्मेतिश्रुतेः ननुत
र्हिसर्वविकाराभिन्नत्वाद्विनाशित्वप्रसंगइत्याशंक्यसर्वस्याध्यस्तत्वेनवास्तवभेदाभावात्सर्व बाधाधि

नमो वर्षिष्ठायत्रिनयनयविष्ठायचनमोनमःसर्वस्मैतेतदिदमितिसर्वायचनमः२९

ष्ठानत्वेननचश्रुतिषुसामानाधिकरण्येनव्यपदेशादद्वितीयस्यब्रह्मणोनविकारगंधोपिसंभाव्यतइत्य
भिप्रायेणनमस्कुर्वन्नाह तदिमितिसर्वायचनमइति तत्परोक्षंइदमपरोक्षमित्यनेनप्रकारेणअनिर्वा
च्यंसर्वंयत्रसतदिदमितिसर्वस्तस्मै बहुव्रीहावन्यपदार्थप्रधानत्वान्नसर्वनामतातेनसर्वाधिष्ठान
भूतायतुभ्यंनमइत्यर्थः हरिपक्षेप्येवम् केवलंसंबोधनत्रयमन्यथाव्याख्येयम् प्रियाणिवेषधिकसु



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खानिवैराग्योद्बोधेनदुनोतिनाशयतीतिप्रियदवः तथाचस्मरोवासनातंहरतीतिस्वभक्तसुद्रेकेणेतिस्म
रह्नरः तथात्रयाणांलोकानांनयनवत्सर्वार्थावभासकस्त्रिनयनइतिप्रागपिव्याख्यातम् २९ अधुनापू
र्वोक्तसर्वार्थसंक्षेपेणनमस्कुर्वन्स्तुतिमुपसंहरति विश्वोत्पत्तौविश्वोत्पत्तिनिमित्तंबहुलंतमःसत्त्वाभ्या
मधिकंरजोयस्यतस्मैउद्रिक्तरजसे भवत्यस्माज्जगदितिभवोब्रह्ममूर्त्तिस्तस्मैतुभ्यंनमोनमः तथात

बहलरजसेविश्वोत्पत्तौभवायनमोनमः प्रबलतमसेतत्संहारेहरायनमोनमः

संहारेतस्यविश्वस्यसंहारनिमित्तंप्रबलंसत्त्वरजोभ्यांअनभिभूतमुद्रिक्तंतमोयस्यतस्मैहरतीतिहरोरु
द्रमूर्त्तिस्तस्मैनमोनमः तथाजनानांसुखकृतेसुखनिमित्तं कृतशब्दोव्ययोनिमित्तवाची सत्वस्योद्रिक्त
वुद्रेकेरजस्तमोभ्यामाधिक्येस्थितायेत्यर्थाल्लभ्यते सत्त्वोद्रेकेइतिवापाठः अथवासत्त्वोद्रिक्तोसत्यांज
नानांसुखंकरोतीतिजनसुखकृत्तस्मै यद्वासुखस्यकृत्तस्मै यद्वासुखस्यकृतंकरणंभावेक्तः तस्मिन्उत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्निमित्तम् एवंव्याख्याने प्रक्रमभंगदोषोनभवति पूर्वपर्यायद्वयेउत्तरपर्यायेच सप्तम्यंतनिमित्तनिर्देशा
त् मृडयतिसुखयतीतिमृडोविष्णुस्तस्मै पालनस्यैवोद्देश्यत्वात्क्रमभंगेनपश्चान्निर्देशः एवंगुणत्रयो
पाधीन्नत्वान्निर्गुणंप्रणमति प्रमहसिपदेनिस्त्रैगुण्येशिवायनमोनमः निर्गतंत्रैगुण्यंयस्मात्तन्निस्त्रैगु
ण्यंतस्मिन् पदेपदनीयेतत्पदप्राप्तिनिमित्तम् कीदृशे प्रमहसि प्रकृष्टंमाययानभिभूतंमहोज्योतिर्यस्मिं

जनसुखकृतेसत्त्वोद्रिक्तौमृडायनमोनमः प्रमहसिपदेनिस्त्रैगुण्येशिवायनमोनमः ३०

स्तत्तथा सर्वोत्तमप्रकाशरूपत्रिगुणशून्यमोक्षनिमित्तमित्यर्थः शिवायनिस्त्रैगुण्यमंगलस्वरूपाय शिव
मद्वैतंचतुर्थमन्यंतइतिश्रुतेः प्रमहसिपदेस्थितायेतिवा हरिपक्षेप्येवम् ३० एवमस्तुत्यरूपेणैवभग
वंतंस्तुत्वास्वस्यौद्धत्यपरिहारंमत्त्वेतांवाणीमित्यत्रोपक्रांतमुपसंहरन्नाह हेवरदसर्वाभीष्टदेत्यु
पसंहारेयोग्यंसंबोधनम् तवपादयोर्मद्वाक्यपुष्पोपहारंभक्तिराधात् त्वद्विषयारतिरर्पितवती





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथापुष्पाणि मधुकरेभ्यः स्वमकरंदं प्रयच्छंत्यन्येषामपि दूरात् गंधमात्रेण प्रमोदमादधति तथैतानि-
स्तुतिरूपाणि वाक्यानि भक्तिरसिकेभ्यो भगवन्माहात्म्यवर्णनामृतरसं प्रयच्छंति अन्येषामपि श्रवण
मात्रेणापि वस्तुस्वाभाव्यात्सुखविशेषमादधतीति ध्वनयितुं ज्ञापयितुं वा पुष्पत्वेन निरूपितम् तथा
च वाक्यान्येव पुष्पाणि तैरुपहारः पूजार्थमंजलिस्त्तमित्यर्थः किं कृत्वा आधात् इत्यनेन हेतुना चक्षि

कृशपरिणतिचेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः

तं भीतं स्तुतेर्निवर्त्तमानं मामममंदीकृत्य न मंदं अमंदं कृत्वा बलात्स्तुतौ प्रवर्त्त्येत्यर्थः तथा चान्यमत्या
प्रवृत्तस्य मम सस्खलितेपि क्षंतव्यमित्यभिप्रायः इतिशब्देन सूचितं भयकारणमाह कृशेत्यादिना कृ
शा अल्पा परिणतिः परिपाको यस्य तत्तथा अल्पविषयमित्यर्थः तादृशं मम चेतश्चित्तं ज्ञानं वा तथा क्ले
शानामविद्यास्मितारागद्वेषाभिनिवेशानां वश्यमायत्तं सर्वदा रागद्वेषादिदोषसहस्रकलुषितमित्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्थः क्लेशेनातिप्रयत्नेनवश्यमितिवा तेनत्वद्गुणवर्णनेत्यंतायोग्यमित्यर्थः गुणानांसीमासंख्यापरिमाण
योरियत्तातामुल्लंघयितुंशीलंयस्याःसागुणसीमोल्लंघिनीशश्वदृद्धिः नित्याविभूतिः तेनैतादृशादुर्वास
नासहस्त्रकलुषितमित्यल्पविषयंममनः क्वअनंतानित्यातवपरमाविभूतिर्वाक्व इत्यंतासंभावना

इतिचकितममंदीकृत्यमांभक्तिराधाद्वरदचरणयोस्तेवाक्यपुष्पोपहारम् ३१ कु
सुमदशननामासर्वगंधर्वराजःशिशुशशधरमौलेर्देवदेवस्यदासः सखलुनिज
महिम्नोभ्रष्टएवास्यरोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यंमहिम्नः ३२

ममभयहेतुरित्यर्थः एतदवधारणेचतवभक्तिरेवकारणमितिभक्तेरत्यंतासंभावितफलदानेपिसाम
र्थ्यंदर्शयति यस्मादेवंतस्मात्सर्वापराधानविगणय्यपरमकारुणिकेनत्वयात्वद्विषयाभक्तिरेवममां
गीकरणीयेतिवाक्यतात्पर्यार्थः ३१ अयंश्लोकःस्तोत्रानंतर्गतःक्षेपकश्चेतिसर्वंभद्रम् ३२



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इममपिश्लोकं पठंति ३३ हरिशंकरयोरभेदबोधोभवतुक्षुद्रधियामपीतियत्नात् उभयार्थतयाम
येदमुक्तंसुधियःसाधुतयैवशोधयंतु १ यत्नतोवक्रयारीत्याकर्तुंशक्यंविधांतरम् यद्यपीहतथा
प्येषऋजुरध्वाप्रदर्शितः २ श्लोकानुपात्तमिहनप्रसंगात्किंचिदीरितम् श्लोकोपात्तमपिस्तोके
रक्षरैःप्रतिपादितम् ३ महिम्नाख्यस्तुतेर्व्याख्याप्रतिवाक्यंमनोहरा इयंश्रीमद्गुरोःपादपद्मयोरर्पितामया

सुरगुरुमुनिपूज्यंसर्वमोक्षैकहेतुंपठतियदिमनुष्यःप्रांजलिर्नान्यचेताः व्रजतिशिवस
मीपंकिंनरैःस्तूयमानःस्तवनमिदममोघंपुष्पदंतप्रणीतम् ३३ ४ भूरिभूषितदेहायद्विज

राजेनराजते एकात्मनेनमोनित्यंहरयेचहरायच ५ इतिश्रीमद्विश्वेश्वरसरस्वतीचरणारविंदमधुप
श्रीमधुसूदनसरस्वतीकृतामहिम्नःस्तुतिव्याख्यासंपूर्णा गोत्राष्टसप्तभूशाके१७८७माधवेमासिप
क्षके शुक्लेब्राह्मतिथौजीववारेक्रोधनवत्सरे १ महिम्नाख्यस्तोत्रटीकाद्विधारा ज्ञानसागरे श्रीमुंबय्यांशिलायंत्रेश्री
धरेणांकितंकृतम् १



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इतिमहिम्नस्तोत्रटीकासमाप्ता ॥

For Private and Personal Use Only